A.C. Joshi Library
P.U. Chandigarh

MSS No. 343 B Subject Religion

Name of MSS श्रीमद् भागवत सटीक

Author शंकराचार्य

Period ____ Folios 41

Script Devnagiri Source Prithipal Singh.

Missing Folios 40 A

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वितीयस्यारंभः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1

भा
द्विती
१

ॐ श्रीगणेशाय नमः ॥ ॐ द्वितीये तु दशाध्याये श्रीभागवतमादितः । उद्दिष्टं लक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते तत्र तु
प्रथमेऽध्याये कीर्तनश्रवणादिभिः आविष्टं भगवद्रूपं मनसो धारणोच्यते यन्नामकीर्तनं दानतपोयो
गादिसत्फलं तं निरस्य परमानंदं हरिं स्मरत सनातनं प्रथमद्वितीयस्कंधसंबंधमाह । पूर्वमुपोद्घातः प्र
संगः शुकागमः राज्ञा पृष्टो नृणां कृत्यमथाह शुकः सन्मुनिः राज्ञः प्रश्नमभिनंदति वरीयानिति ।
तेन याऽपि संसाराऽनवधारितविषयमध्येयः परः श्रेष्ठः गोचरः प्रश्नः कृतः नयप्रवर्तो यान यतो लोकहितमेतन्ना
तदेतन्नात आत्मविदां मुक्तानां च संमतो यतः । तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन्

श्रीशुकः ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप १ आत्मवि
त्संमतः पुंसां श्रोतव्यादि षु यः परः । श्रोतव्यादीनि
राजेंद्र नृणां संति सहस्रशः अपश्यतामात्मतत्त्वं गृहेषु
गृहमेधिनाम् २ निद्रया ह्रियते नक्तं व्यवायेन च वा
वयः दिवा चार्थेहया राजन् कु टुंबभरणेन वा ३ देहापत्य
कलत्रादिष्वात्मसैन्येष्वस त्स्वपि तेषां प्रमत्तो निधनं पश्यन्नपि ना। पश्यति ४ ॥

न४

श्रुतिविहिताविपर्ययमिति सम्यग्वाऽनन्तरमाह श्रोतव्यादीनि इति त्रिभिः गृहेषु सक्तानामतएव गृहमेधिनां
तद्व पंचसूनापराणामेधतिः हिंसार्थः तेषामेव शरीरवाप्तमयो भवति तस्मात् नक्तं रात्रौ वयः आयुः ता
न्निद्रया व्यवायेन रत्या वा ह्रियते दिवा प्रहियते अर्थेहया अर्थार्थमुद्यमेन सिद्धार्थं कुटुंबपोषणे
न वा स्वकालं व्यवकास समुच्चयार्थी प्रस्मिन्निर्वर्क्रमस्येवाधिकारा निंदा स्वावेशः पन्न नयन् प्रमत्त कर्मसो
नेवमाह १ ननु स्वरक्षार्थं कुटुंबं चायं र्थं कथमायुर्व्ययं कुर्यात् तत्राह देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु

मिथ्याभूतेष्वपि प्रमत्तः ते पां पित्रादि दृष्टांते नमाशं पश्यन्नपि नानुसंधत्ते ४ ॥
प्रसक्तः१

व्ययः तत्र २
कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी पंचसूना गृहस्थस्य स्वभवेन्निरयसूचकाः ४८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1A

यानीति ज्ञानं येन ज्ञानेन हरेतयत्नं करोति १२ ॥

एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह तस्मादिति हे भारत सर्वात्मेति श्रेष्ठत्वमाह भगवानिति
माहात्म्यं ईश्वर इत्यावश्यकत्वं हरिरिति विघ्नहारित्वं अभयं मोक्षमिच्छता ५ अतः परं श्रेयो न्यत्तन्नास्तीत्याह एतावा
निति एतावानेव जन्मनो लाभः फलं तमाह नारायणस्मृतिरिति सांख्यादिभिः साध्यत इति तेषां ख्यातं अन्ते लाभ भवेद्वा
स्यति सांख्यमात्मानात्मविवेकः योगोऽष्टाङ्गः स्वस्मृतिः परो लाभः न तत्र महिमा न त्वक्षुभ्राकतत्त्वम् ६ तत्र
सदाचारं प्रमाणयति प्रायेणेति विधिनिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि समग्रसिद्धं

तस्माद्भारत सर्वात्मा भगवानीश्वरो हरिः श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ५ एतावा
न्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ६ प्रायेण मुनयो रा
जन्निवृत्ता विधिषेधतः नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ७ इदं भागवतं नाम पुराणं ब्रह्मसं
२ मितम् अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ८ परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ९ तदहं तेऽभिधास्यामि महापौरुषिको भवान् यस्य श्र
द्दधतामाशु स्यान्मुकुन्दे मतिः सती १० एतन्निर्विद्यमानानामिच्छतामकुतोभयं योगिनां नृप निर्णीतं १२
हरेर्नामानुकीर्तनम् ॥ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह वरं मुहूर्तं विदितं घटते श्रेयसे यतः

किमिदमपूर्वं कथयसि सत्यमनादि एवमेवेदमित्याह इदं भागवतमित्यादि तन्नामैकप्रधानं पुराणं ब्रह्मसंमितं सर्व
वेदतुल्यं यद्वा ब्रह्मसम्यक् मितं येन कृतस्त्वया प्राप्तमत आह अधीतवानिति सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिः
तत्राह परिनिष्ठितोऽपीति गृहीतचेताः आकृष्टचित्तः ९ महापौरुषिको विष्णुः तदीयः यस्मिन्कर्णेतां सती श्रद्दधता
की १० साधकानां सिद्धानां च ततः परमन्यत् श्रेयोऽस्तीत्याह एतदिति इच्छतां कामिनां तत्तत्फलसाधनमे
तदेव निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमाणान्तरमा

मित्यर्थः १२ अल्पमेवायुरवशिष्टं किमहं साधयेयमिति मा शुच इत्याह किमिति त्रिभिः परोक्षैरलक्षितैर्हायनैर्वर्षैर्विदितं हायना

फि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा०टी०
टी०
२

खट्वांगो हि देवपक्षे स्थित्वा दैत्यानवधीत् ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तस्तेनोक्तं प्रथमं तावन्ममायुः कथ्यता
मिति ततो देवैरुक्तमस्य मुहूर्तमात्रमस्तीति ततो यानेन विमानेन भुवमागत्य हरिं शरणं गत इति यतः इयं सर्वापि भूमिः
शुची १२ तव तु पतन्न्यपि इदानीमपि तावदनितना वता कालेन सांपरायिकं पारलौकिकं साधनं संपादय इत्याह तवेति १४
तत्रैव रागप्रता वदाह अंतकाल इति गतसाध्वसः मरणभयशून्यः असंगो नाम अनासक्तिः तेन शस्त्रेण स्पृहां छिंद्यात् दे
के तं देहमनु ये पुत्रकलत्रादयः तेष्वपि स्पृहां छिंद्यात् १५ किंच गृहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनः प्यास
क्तिसंभवात् तत्रांतरंगायोगमाह धीर इति ब्रह्मचर्यादियमोपलक्षणं पुण्यतीर्थेति स्नानादिनियमोपलक्षणं

खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिं १३ तवाप्येतर्हि कौ
कौ रव्य सप्ताहं जीवितावधिः उपकल्पय तत्सर्वं तावद्यत्सांपरायिकं १४ अंतकाले तु पुरुष आगते गतसाध्व
सः छिंद्यादसंगशस्त्रेण स्पृहां देहेऽनु ये च तम् १५ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ
विविक्त आसीनो विधिवत्कल्पितासने १६ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं मनो यच्छेज्जित
श्वासो ब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः मनः कर्मभिराक्षिप्तं शु १८
भार्थे धारयेद्धिया १८ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्

आसनमाह शुचौ शोधिते विविक्ते एकांते विधिवत् कुशाजिनचैलैः क्रमेणोपरि निर्मिते आसने १६ मधुगर्भं प्राणा
यामं वक्तुं नयमाह त्रिवृत् त्रिभिरकारादिभिर्वर्णैर्निर्मितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् आवर्तयेत मनसा
इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनो नियममाह मनो यच्छेत् ब्रह्मबीजं प्रणवमविस्मरन् त्वेवाजितश्वासः
सन् १७ प्रत्याहारमाह नियच्छेत् अक्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः धारणामाह म
न इति पुनश्च कर्मभिः यदा मनो आक्षिप्तं तदा मनाक् शुभार्थे भगवद्रूपे ध्यानमाह तत्रेति एकमेकं पादादि अव
यवमव्युच्छिन्नेन समग्ररूपानुस्मरणेन विषयांतराविशेषं सामान्यतः चित्तस्थिरीकरणं धारणा अवयवश

२

2A

प्रसीदति उपशाम्यति गुणावपगात्पुनर्गोपितत्तोभे सतिधारणामेव स्थिरीकुर्यादित्याह रजस्तमआदितिभ्रंतमनसाविमूढंद्धी
येमनोविमृश्यात तत्क्षणेनरजस्तमोभ्यांहृते २० यतः यस्यांक्रियमाणायांभद्रंसत्वात्मकंआश्रयंविषयंपश्यतःतदे
वशीघ्रंनिर्भवति २१ यथायत्रयादृशीवेतिकर्तव्यतांविषयतद्विशेषाणानोप्रश्नः २२ यथेत्यस्योत्तरंजितासनइतिाव
षयेतस्यतत्तविराड्जीवनियंताभगवानेवविषयइत्याह अंडकोषांतर्वर्तिनिकायहृपवणिप्युविवारतो तव
म्हस्थूलइतिसार्थेन २३ विशेषोविराड्देहः स्थविष्ठानामपिस्थूलतरःसकार्यमात्रंश्रुस्यवोपलक्षणात्रेनविषं
पदंतत्परस्मिन्विमोर्मनोयत्रप्रसीदति रजस्तमोभ्यामाक्षिप्तंविमूढंमनआत्मनः २० यत्संधारणयाधीरोहंति
याततकृतंमलम् २० यतःसंधार्यमाणायायोगिनोभक्तिलक्षणः २१ आशुसंपद्यतेयोगआश्रयंभद्रमी
क्षतः २१ श्रीराजोवाच यथासंधार्यतेब्रह्मन्धारणायत्रसंमता कीदृशीवाहरेदाशुपुरुषस्यमनोमलं २२
श्रीशुकोवाच जितासनोजितश्वासोजितसंगोजितेंद्रियः स्थूलेभगवतोरूपेमनःसंधारयेद्धिया २३
विशेषस्तस्यदेहोयंस्थविष्ठश्चस्थवीयसां यत्रेदंदृश्यतेविश्वंभूतंभव्यंभवच्चसत् २४ अंडकोशश
रीरेस्मिन्सप्तावरणसंयुते वैराजःपुरुषोयोसौभगवान्धारणाश्रयः २५ पातालमेतस्यहिपादमूलं
पठंतिपार्ष्णिप्रपदेरसातलम् महातलंविश्वसृजोथगुल्फौतलातलंवैपुरुषस्यजंघे २६ द्वेजानुनी
सुतलंविश्वमूर्तेरूरुद्वयंवितलंचातलंच महीतलंतज्जघनंमहीपतेनभस्तलंनाभिसरोगृणंति २७॥
अपतेजोवाय्वाकाशाहंकारमहत्तत्वानीतिसप्त २५ विराड्देहतज्जीवतदंतर्यामिणामभेदमारोप्योपासनंकर्त
व्यमित्याशयेनाह पातालंपादमूलं पातालादीनांतद्दृष्टयवताविधीयते पातालादीन्यतलांतानिप्रथमत्त
नादारभ्यसप्तभूमिविवराणिपठंतिगृणंतीत्यादि प्रमाणप्रदर्शनंपार्ष्णिप्रपदेपादस्यपश्चाग्रभागौ २६
ऊरुद्वयंतस्याग्रयोभागोवितलंउत्तरभागोअतलमितिज्ञेयं नाभिरेवसरः २७ ॥ ॥ ॥ ॥

पादस्याधोभागः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

3

श्रीभाग टी ३

ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं महर्लोकं ग्रीवेति गृणंति तपोलोकं वराटीं ललाटं सत्यं सत्यलोकं २८ उस्रा
देवाः तेजोमयत्वात् तत एव बाहव इत्याहुः दिशः श्रवणादेः श्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठानं श
ब्दस्तु श्रोत्रविषयः एतत्स्य श्रोत्रं द्वियं एवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासे नासापुटे इद्धः दीप्तः
द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं पतंगः सूर्यः अहनी रात्र्यहनी परमेष्ठिधिष्ण्यं ब्रह्मपदं तालु अ २९ पक्ष्माणि नेत्रलोमानि ४

उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य तपो ललाटीं विदुरादिपुंसः सत्यं तु शीर्षाणि स
हस्रशीर्ष्णः २८ इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः नासत्यदस्रौ परमस्य नासे
घ्राणोस्य गंधो मुखमग्निरिद्धः २९ द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च तद्भ्रूविजृं
भः परमेष्ठिधिष्ण्यमापोस्य तालू रस एव जिह्वा ३० छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेह
कला द्विजानि हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः ३१ व्रीडोत्तरौष्ठोधर एव लोभो
धर्मः स्तनोधर्मः पथोस्य पृष्ठः कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोस्थिसंघाः ३२ नद्यो
स्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र अनंतवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्मगुण
प्रवाहः ३३ ॥

धिष्ण्यं स्थानं इंद्रियं ४ छंदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजा दंताः तव
मोक्षं उदंते सर्ग इति यत्तत्तस्य कटाक्षः ३१ अधर्ममार्गोस्य पृष्ठभागः कः प्रजापतिः मित्रौ मित्रावरुणौ ३२
अनंतवीर्यं यस्य सः वयः कालः तस्य गमनं गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ३३ ॥

अपारः २

चंद्रोपि सर्वविकारकोश उच्यते तस्मादि मार्गत्वात् १

3A

भूम्नः विभोः अव्यक्तं प्रधानं सप्रसिद्धः चंद्रमाः तदीयं मनः सर्वेषां विकाराणां कोश इवाश्रयभूतं ३४ विज्ञानश
क्तिं विज्ञं महिमं महत्तत्त्वं अंतःकरणं अहंकारं गिरित्रं श्रीरुद्रं गर्दभाश्वोष्ट्रयामुन्यत्राश्वतरी ३५ वयांसि पक्षिणः
तस्य व्याकरणं नामरूपव्याकरणमिति शिल्पनैपुण्यं यथाहुः येन शुक्लीकृता हंसाः शुकाश्च हरिती
कृताः मयूराः चित्रिता येन स ते वृत्तिं विधास्यतीति मनुः स्वायंभुवः मनीषा बुद्धिः मनुजः पुरुषः निवासः आ

ईशस्यकेशान्विदुरंबुवाहान्वासस्तुसंध्यांकुरुवर्यभूम्नः अव्यक्तमाहुर्हृदयंमनश्चसचंद्रमाःसर्ववि
कारकोशः ३४ विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोंतःकरणंगिरित्रं अश्वाश्वतर्युष्ट्रगजानखा
निसर्वेमृगाःपशवःश्रोणिदेशे ३५ वयांसितद्व्याकरणंविचित्रंमनुर्मनीषामनुजोनिवासः गंध
र्वविद्याधरचारणाप्सरःस्वरस्मृतीरसुरानीकवीर्यः ३६ ब्रह्माननंक्षत्रभुजोमहात्माविडूरुरंघ्रि
श्रितकृष्णवर्णः नानाभिधाभीज्यगणोपपन्नोद्रव्यात्मकःकर्मवितानयोगः ३७ ॥

अथः पुरुषवेवाविस्तरात्मेतिश्रुतेः गंधर्वादीनां हंहेस्मं गंधर्वादयः स्वरस्मृती षड्जादिस्वरस्मृतयः इत्यर्थः
असुरानीकंवीर्यंयस्य स्वरस्मृतिरसुरानीकवर्य इति पाठे गंधर्वादयः स्वरः असुरसमूहश्च वीर्यः प्रह्लादः
स्मृतिः स्त्रस्येति ३६ ब्रह्मविप्रस्तस्याननंमुखंक्षत्रंक्षत्रियोभुजायस्य विट्वैश्यः ऊरूर्यस्य अंघ्रिश्रितः कृ
ष्णवर्णः शूद्रो यस्य नानाभिधा नामानि येषां ते अभीज्या देवास्तेषां गणैः वसुरुद्रादिभिरुपपन्नो युक्तः द्र
व्यात्मकोहविःसाध्यः वितानयोगः यज्ञप्रयोगः तस्यकर्म कार्यं आवश्यकं कर्म अभिप्रेत इत्यर्थः ३७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एक ३

श्री भा० द्वि० टी० ४

इयानेतावानसन्निवेशः अवयवसंस्थानं अस्मिन्वपुषि मनः संधार्यते स्थविष्ठे यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् ३८ तदेवं चित्तस्थैर्यार्थं विराट्देहजीवस्य आत्मनो [illegible] अभेदेनोपासनमुक्तं तत्र तु देहजीवोरीश्वरे प्रविलाप्य स एव ध्येय इति निर्धारयति स इति सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एव सर्वो नरात्मा तमेव सत्यं भजेत अन्यत्र नोपलक्षणेन सज्जेत यत आत्मनः पातः संसारो भवति एकस्य तस्य इंद्रियैः सर्वानुभूतौ दृष्टांतः स्वप्नजना [illegible] तो ईक्षिता यथेति स्वप्ने हि कदाचित्त्वबहून्देहान्

इयानसावीश्वरविग्रहस्य यः संनिवेशः कथितो मया ते संधार्यतेस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या नयतोस्ति किंचित् ३८ स सर्वधीवृत्त्यनुभूतसर्वः आत्मा यथा स्वप्नजनेक्षितैकः तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ३९ इति श्रीभागवते द्वितीयस्कंधे प्रथमोध्यायः १ शुक उवाच एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः १ ॥

प्रकल्प्य नीवस्तानिंद्रियैः सर्वं पश्यति तद्वत् ईश्वरस्य तु विद्याशक्तित्वान्नबंधः ३९ इति श्रीभावार्थदीपिकायां द्वितीये प्रथमः १ द्वितीये तु ततः स्थूलधारणातो जितं मनः सर्वस्मात् [illegible] सर्वेषां विसोढा धार्यमितीर्यते दृष्टफलं चन्द्रपे वक्तुकामो वैराजधारणा इहायनेन तस्या ध्यान सर्वात यो [illegible] धारणा तत्र तावत्पूर्वोक्त धारणायाः अवांतरफलमाह एवं या धारणातया तुष्टाद्देः पुरा प्रलयसमये नष्टां स्मृतिं प्रत्यवरुध्य लब्ध्वा अप्यया प्रागिदं विश्वं यथासीत्तथा ससर्जे व्यवसायात्मिका बुद्धिर्यस्य अनर्थं अमोघा दृष्टिर्यस्येति अनेन धारणया विश्वसृष्टिसामर्थ्यं भवति १॥ राम ॥ ॥ ४

4A

ऽप्यासना फलादिषु विरक्तस्य ब्रह्मण्यवधारणायामधिकारः अतो वैराग्यार्थं सर्वं कर्मफलं निंदति शाब्दस्य ब्रह्मणो
वेदः तस्यैष पंथाः कर्मफलबोधनप्रकारः कोसौ अर्थशून्यैरेव स्वर्गादिनामभिर्यन्नामसाधकस्यार्थं ध्यायति तत्र
दित्सो करोतीति यत अपार्थैरमेवाह तत्र मायामये पथि स्वर्गमिति वासनया शयानाः स्वप्नं पश्यन्निव परिभ्रमन्नु
अर्थान्न विंदति तत्र हि लोके भ्रमणापि निरवद्ये सुखं लभत इत्यर्थः २ तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहापातः
स्यादित्याशंक्याह अतः कविर्नाममात्रेषु भोगेषु यावतार्थेन देहनिर्वाहो यस्य तथाभूतः स्यात अप्रमत्तः नाव

शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः परिभ्रमंस्तत्र न विंदतेर्थान्मायामये वासनया
शयानः २ अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः सिद्धेन्यथार्थे न यतेत तत्र भूयः परिश्र
मं तत्र समीक्षमाणः ३ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं सत्यंजलौ किं पुरु
धान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ४ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः पर
भृतः सरितोप्यशुष्यन् रुद्धा गुहाः किमजितोवति नोपसन्नान्कस्माद्भजंति कवयो धनदुर्मदांधान् ५

नामेष्वनासक्तः व्यवसायबुद्धिः इदं स्वरूपमिति निश्चयवान् तथापि तत्र तस्मिन्नर्थे अन्यथैव सिद्धे सति तत्र यत्नैः
परिश्रमं पश्यन् न यतेत ३ अन्यथा सिद्धिमाह द्वाभ्यां सत्यामिति कशिपोः शय्यायाः स्वतः सिद्धे बाहौ सति उप
बर्हणैः उच्छीर्षकैः पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण ४ ननु दिक्वल्कलादौ नाम संग्रहमेव वल्कले
अन्नं तोयं वासः स्यान्तथाप्यज्ञान प्रयत्नं विना कथं प्राप्यते तत्राह चीराणि वस्त्रखंडानि पथि स्थानि विप्रकीर्णानि[?] सं
तिफलादिभिर्ये परेषां भरणं[?] दिर्यः ननु कदाचिदेषामलाभे किं कार्यं तत्राह अजितो हरिः उपसन्नान्शर
णागतान् किं न रक्षति नरक्षति किं पाहस्य पूर्वं जापि संबंधः धनेन यो दुर्मदः तेन अंधानतान् ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

5

श्री०
भा० द्वि०
टी० ५

तदातेनाकिंकर्तव्यमित्यत आह एवंविरक्तः सन् तं भजेत भजनीयत्वे हेतुमाह स्वचित्ते स्वत एव सिद्धः यत आ
त्मा अत एव प्रियः प्रियस्य च सेवास्य सुखरूपैव अर्थश्च सत्यः न तु नाशवान् मिथ्या भगवान् भजनीयगुणोऽनन्तश्च नि
त्यः यद्वा एवंभूतः तं भजेत नियतार्थः निश्चितस्वरूपः तदनुभवानंदेन निर्वृतः सन् इति सतः सुखात्मत्वं दर्शितं किंच
यत्र यस्मिन् भजने सति संसारहेतोरविद्यायाः उपरमो नाशो भवति एतदेवान्यचिंतानिंदया द्रढयति तां तथा
भूतां परस्य हरेरनुचिंतां अथवा परामनादृत्य पशून् ऋते कर्मजन् विना यथा पशुरेवायं स देवानामिति श्रुतेः असतीं वि

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ६
कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात् पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापा
न् जुषाणं ७ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं चतुर्भुजं कंजरथांगशंखगदाध
रं धारणया स्मरंति ८ प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससम् लसन्महारत्न
हिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलम् ९॥

अथ चिंतां को नाम कुर्यात् तया चिंतया वैतरण्यां पतितं तत्र स्वकर्मजान् आध्यात्मिकादिक्लेशान् सेवमानं जनं पश्य
न् वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ७ तामेव धारणां सविशेषमाह केचिदिति षड्भिः स्व
देहस्यांतः मध्ये यत् हृदयं तस्य यावकाशः तस्मिन् वसंतं प्रादेशः तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं य
स्येति हृदयपरिमाणं तेनोपवर्ण्यते कंजं पद्मं रथांगं चक्रं ८ नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य कदंबकु
सुमस्य किंजल्काः केसराः तद्वत् पिशंगेन पीतेन वाससा यो यस्य लसंति महारत्नानि येषु तानि स्वर्णमयानि अंगदा
नि यस्य स्फुरंति वत्तानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य ९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

5A

उन्निद्रं विकसमानं यत् हृत्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन् योगिस्वैरास्थापितो पादपल्लवो यस्य श्रीरेव लक्ष्म
विद्रुतवक्षकं यामादि विदितो मन्तर्यौ योन [?]त्वयः कौस्तुभं रत्नं कंधरायां यस्य अम्लानालक्ष्मीर्घाभा यस्याः
तया वनमालया वितिंवांसं १० स्निग्धमादिविशिष्टैः कुंतलैर्विराजमानेनाननेन याहासः तेन पेशालं मंदं
अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन् उल्लसंतो ये भ्रूभंगाः भ्रूविक्षेपाः तैः संभावितो भूरि अनुग्रहः

उन्निद्रहृत्पंकजकर्णिकालये योगीश्वरास्थापितपादपल्लवम् । श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्ला-
नलक्ष्म्या वनमालयाचितम् १० विभूषितं मेखलयांगुलीयकैः महाधनैर्नूपुरकंकणादिभिः स्निग्धा-
मलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलम् ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसं-
भावितभूर्यनुग्रहम् ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणया वतिष्ठते १२ एकैकशोंगा-
नि धिया नुभावयेत्पादादि यावद्धसितं गदाभृतः जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धी-
र्यथा यथा १३ यावन्न जायेत परावरेस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य रू-
पं क्रियावसाने प्रयतः स्मरेत १४

येन चिंतामयं चिंतया आविर्भवंति १२ अस्यैव ध्यानमाह एकैकश इति अनुभावयेत् यद्यज्जितं अयत्नेन स्फु-
रितं पादगुल्फादि स्थानं अवयवस्तदपोह्य त्यक्त्वा परंपरं जंघाजान्वादि धारयेत् शुध्यति तस्मिन् स्थिरा भवति
१३ एवं कियंतं कालं धारणा यावदाराध्यं आह यावदिति परे ब्रह्मादिभ्यो वरे यस्मात् अतः विश्वेश्वरे द्रष्टरि
तटस्थे चैतन्ये चेतनत्वात् भक्तियोगः प्रेमलक्षणः क्रियावसाने आवश्यककर्मानुष्ठानानंतरं अनेककर्मापि

॥ [illegible] ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तं इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्धैस्त्रिभिः
अंग हे राजन् एवंभूतो यतिर्यदा इमं लोकं देहं जिहासुः त्यक्तुमिच्छति तदा देशे पुण्ये तीर्थे काले च उत्तरायणादौ
मनो न सज्जयेत् संगं न प्रापयेत् न देशकालौ योगिनः सिद्धिहेतू किं तु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुख
करं चासनमास्थितः प्राणांश्च नियच्छेदित्यर्थः १५ एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत् विलापयेत्

स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममंग लोकं कालेच देशेच मनो न सज्जयेत्प्रा
णान्नियच्छेन्मनसा जितासुः १५ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि
आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् १६ न यत्र कालोऽनिमिषां परः प्र
भुः कुतो नु देवा जगतां य ईशिरे न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम् १७
॥

तं च क्षेत्रज्ञमात्मनि शुद्धे तं च शुद्धमात्मानमात्मन्येवाहमित्यात्मनि शुद्धे ब्रह्मण्यवरुध्य एकीकृत्य ल
ब्धोपशान्तिः परमानिर्वृतिः सन् कृत्याद्विरमेत ततः परं प्राप्याभावात् १६ तदेवाह न यत्रेति यत्रात्म
स्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः अत एव देवाः न प्रभवन्तीत्याह अनिमिषां देवानां परः प्रभुः
कालोऽपि यत्र न प्रभुः तत्र कुतो नु देवाः प्रभवेयुः देवनियन्तॄणां जगतां शासितॄणां का वार्तेत्याह जगता
मिति कुतोऽप्रभवन्तीत्यर्थः [illegible]त्त्वादयो निरूपाधित्वादित्याह न यत्रेति विकारः अहंकारः १७ ॥

निरूप्याधियं कुर्वीत इत्यत आह परमिति यत्र यस्मात् अनन्ताख्यं आत्मविलक्षणं इति नेति नेतीत्येवमतत्त्यक्तुमिच्छवो देहादात्मयं
देहाद्यात्मत्वं विसृजन्त अहं मम इत्यनात्मबुद्धीर्विसृज्यन्तः परं पदं तत्तो तत्तो हृदाऽवगूहन्त आलिङ्गयन्तो नान्यस्मिन् सोऽहं
येषां तथाभूताः सन्तः तद्वैष्णवं परं पदं अन्तः एव परिसर्वतः शेषमामनन्ति इत्यन्वयः १८ तस्मादित्थं ब्रह्मत्वेनाव
वस्थितो मुनिः निरूप्यैवं त्यजेत् तथा देहेन यदि प्रयास्यन्तिःइति वक्ष्यमाणाः प्रकाशादिदेशादिकः तमाह विज्ञानेन
नेनेति विज्ञानवशात् तेन जातो दृढ्ज्ञानं तस्य वीर्यं बलं तेन सम्यक् रंधिताः विहिंसिताः आशया विषयवासनाय

परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगु
ह्याऽर्हपदं पदे पदे १८ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः स्वपार्ष्णिनाऽपी
ड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः १९ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्यो
रसि तं नयेन्मुनिः ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत २० तस्माद्भ्रुवोरन्तरमु
न्नयेत निरुद्धसप्तायतनोऽनपेक्षः स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः २१

सम्यक् इदानीं तस्य देहत्यागप्रकारमाह स्वपार्ष्णिनापादमूलेन गुदमूलाधारं आपीड्य निरुध्य अनिलं प्राण
मुन्नमयेत् ऊर्ध्वं नयेत् जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु १९ नाभ्यां मणिपूरके स्थितं हृदि अनाह
तचक्रे अधिरोप्य उदानगत्या कण्ठादधो देशे स्थिते विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूले तस्यैव चक्रस्या
ग्रदेशे शनकैर्नयेत् २० तस्मात् भ्रुवोरन्तरं आज्ञाचक्रं निरुद्धानि सप्तायतनानि
सिके श्रुती चेत्यन्तं सप्तायतनानि प्राणमार्गा येन सः अनपेक्षः चेत्स्वर्गादिभोगतः स मूर्धानं मूर्धनि ब्रह्मरन्ध्रं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति द्वाभ्यां यदि पारमेष्ठ्यं पदं प्रयास्यन् भवति वैहायसानां खेचराणां यद्वि
हारं क्रीडास्थानं कीदृशं अष्टाधिपत्यं तत्र अणिमाद्यैश्वर्यं यस्मिन् तदपि प्रयास्यन् गुणानां संनिवायो यत्र गुण
समुदायरूपे ब्रह्माण्डे सर्वत्रेत्यर्थः २२ तर्हि देहत्यागावसरे मनसेन्द्रियाणि च न त्यजेत् किं तु तैः सहैव तल्लोकभो
गार्थं गच्छेत् यतः कर्मगतिवत् योगगतिः परिच्छेत्तुं योगेश्वराणां त्रिलोक्या अन्तश्च बहिश्च महर्लोकादी
षु ब्रह्माण्डगतां बहिर्गतिमाहुः अन्तरे तत्पवनस्थानं सूक्ष्मलिंगशरीरं येषामिति विद्या उपासना तपो भगवद्धर्मः
योगोऽष्टांगः समाधिर्ज्ञानं तानि ये भजन्ति तेषां या गतिस्तां २३ तामाह वैश्वानरमित्यष्टभिः विहायसा आका

यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रि
यैश्च २२ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनां न कर्मभिस्तां गतिमाप्नुवन्ति वि
२३ द्यातपोयोगसमाधिभाजां वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा विधूतक
ल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारं २४ तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः
नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते २५॥

शेन त्वक्षब्रह्मलोकपथेन गतः सन् प्रथमं वैश्वानरमग्न्यभिमानिनीं देवतां याति केनोपायेन सुषुम्णया नाड्या
नाव देहाद्बहिर्निर्गतः शोचिषा इत्याह ज्योतिर्मय्या विधूतः त्यक्तः कल्को मलो येन सः क्वाप्यसज्जमान
इत्यर्थः उपरि अग्रिहर्तमाने उदस्तात् स्थिते हरेः संबंधिना तारूपेण वायतारोपितमित्यर्थः शैशुमारं चक्रं प
वमस्कं पेवत्सु मातं शिशुमाराकारं प्रयाति स च ज्योतिश्चक्रं चक्रस्यानिलाख्यात् इत्यादि अवर्ततानि यत्रातिप्रयातीत्य
र्थः २४ तद्विष्णोः चक्रं विश्वस्य नाभिं मूलं यो याग्रयपूतं ब्रह्माविष्टलिंगत्वात् नाभिवत् नाभिं तस्य नमस्कृतं प्रतिकर्ष

7A

अथो अनंतं कल्पांते विश्वं त्रैलोक्यं अनंतस्यायेन दह्यमानं निरीक्ष्य तत्राप्यूष्म प्राप्नोति द्विपराईस्थायित्वात्पार
मेष्ठ्यं परं प्रतिनिर्याति सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिन् तत् २६ तस्मिंश्च लोके स्थिते २६ तदेवाह यत्र
शोकादिदुःखं दुरंतदुःखं भयं किंतु चित्ततो हेतोर्यत्र दुःखं अरः अतो नरकं विना तत्कुतो भवति अनिदंविदां दुरंतभ
गवतो ध्यानमनात्मनां प्राणिनां दुरंतदुःखोदयः प्रभवो जन्म तस्यानुदर्शनात् तेषां कृपया यद्दुःखं चित्ततो दा

अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वरयुष्ट
धिष्ण्यं यद्द्वैपरार्द्धं तदु पारमेष्ठ्यं २६ न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग
ऋते कुतश्चित् यच्चित्ततोऽदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात्
२७ ॥ राम ॥

मनः पीडेति यत्र ततं विना कुतश्चिदपि यत्र शोकादयो न संतीति तत्र ब्रह्मलोके गतानां त्रिविधा गतिः येषु
तपोकर्षेतागताः ते कल्पांतरेषु तपंतारतम्येनाधिका भवंति यत्तु हिरण्यगर्भोपासनाबलेन गताः
ते ब्रह्मणा सह मुच्यंते ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्वा वैष्णवपदं यांतीति २७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

8

प्रस्तुतस्य भगवद्गुणस्य ब्रह्माण्डभेदेन प्रकारमाह . ततस्त्वादिना तेषु यं प्रक्रियार्थं ईश्वराधिष्ठितायाः प्रकृतेः केन
विदंशेन महत्तत्त्वं भवति तस्यांशेनाहंकारः तस्यांशेन तन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः त
स्यांशेन रूपतन्मात्रद्वारा तेजः तस्यांशेन रसः तन्मात्रद्वारा आपः तदंशेन गंधः तन्मात्रद्वारा पृथ्वी तेषु मिलितेषु
तदंडं भुवनात्मकं विराट्शरीरं तस्य च पंचाशत्कोटियोजनविशालस्य पृथिव्यादिकं दशोत्तरविशेषशालि वा।
ब्धाकोटियोजनविशालं प्रथमावरणं पंचाशत्कोटियोजनविशाले लोके ततश्च प्रवादीनां येऽपरिगणिता ब्रह्माः
तान्येवोत्तरदशगुणान्यावरणानि इमानि तत्प्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथ्व्याद्यावरणभेदप्रकारः

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनोपानलमूर्तिमत्वरन् ज्योतिर्मयो वायुमुपेत्य काले वा
य्वात्मना खं बृहदात्मलिंगं २८ घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव श्रोत्रे
ण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी २९॥

कथमेतत् ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः एवमुत्तरत्रापि ईदृशो निर्भयः कथं यास्या।
मीति शंकाशून्यः तेनात्मना पृथिवीरूपेणातन्त्रिवं ततश्चापः प्रतिपद्य अत्वरन् स्वस्वमर्यादेन तत्तदात्मक
त्वेन स्थितः दाहादिशंकाभावात् यथेष्टं भोगान्भुंजान इत्यर्थः एवं ज्योतिर्मयः सन्काले भोगावसाने बृहदात्म
आत्मनो लिंगं परमात्ममूर्तित्वेनोपासनेषु कंयद्वा वेदशीर्षात्मना तस्य प्रज्ञापकमिति २८ इंद्रियार्थानां भू
तसूक्ष्माणामतिक्रममाह घ्राणेनाधिष्ठितेन गंधमुपेत्य श्वसनं स्पर्शेन नभोगुणत्वं शब्दात्मतां प्राणे
न तत्तत्कर्मेंद्रियप्राणाकूतिं तत्क्रियाम् २९॥

तेदेवं स्थूलमल्पभूतानामतिक्रमणमुक्त्वा न दर्शयन्नहंकाराप्तान्या [redacted] महदादिप्राप्तिमाह स योगी विकार्यं
संसाद्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्योऽहंकारः स त्रिविधः तामसो राजसः सात्त्विकश्चेति तत्र तामसाज्ञ
ग्राणि भूतसूक्ष्माणि तान्येतेनोक्तानि राजसादिन्द्रियाणि तानि सात्त्विकान्मन इन्द्रियदेवाश्चेति पौलयमुक्तं तदहंका
रेतद्भूतसूक्ष्माणि इन्द्रियाणि च सन्निकर्षो लयो यस्य अनेन तामसं राजसं च मनोमयं देवमयं च सात्त्विकं प्राप्य गत्या एवं
गमनेन तेनाहंकारेण सह विज्ञानतत्त्वं याति ततः गुणानां संनिरोधो लयो यस्मिंस्तत्प्रधानं प्राप्नोति ३० तेनात्मना
प्रधानरूपेणानेन मयः स्वोपाधीनामवसाने स्वोपाधिविनिर्मुक्तमानन्दमात्मानमुपैति न विज्ञाते पुनर्नावर्तते ३१

सभूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यं संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसं
निरोधं ३० तेनात्मनात्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने एतां गतिं भागवतीं गतो यः स वै
पुनर्नेह विषज्जतेऽङ्ग ३१ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे च सनातने च
ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ३२

वेदः ३१ एते सृती मार्गौ प्रकारावित्यर्थः हे नृप ये त्वया पृष्टे ते अद्भुतपरं तत्त्वेति सद्योमुक्तिः क्रममुक्तिः
यदि प्रयाणकाले विशेषत्वादिनाक्रममुक्तिश्च याद्वितीया एते सृती वेदेन गीते ते ततस्त्वौ त्वेतिनेत यदा सर्वे प्रमुच्यन्ते कामा
येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः ते अर्चिरभिसंभवन्तीत्यादिना क्रममु
क्तिर्वेदेनोक्ता यद्वा न कर्मभिर्लोकास्तिमानु वेनीति दक्षिणमार्गस्यापि सूचितत्वात एते सृती इति द्विवचनं न या
भिप्रेतं तत्र प्रतिपत्तामितास्तिप्रन्नेन सूर्या अनुक्ति विषये प्रवृत्ते सृती एव हि यद्वा विपर्यं यामितिवदति तान्
नो पर्यायेनाएवं एते सृती इत्यर्थः ३२ ॥

एवं चान्वयाचष्टे ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा टी २

मेति संसरतः पुंसो बहवो मोक्षमार्गाः तपोयोगादयः समीचीनस्तु मेवत्वाह बहीति यतो नुष्ठिताद्भक्तियोगो
भवेत् प्रवृत्तो न्यः शिवः स्वस्वरूपो निर्विघ्नश्च नास्त्येव ३३ कुत एतदत आह भगवान्ब्रह्मा कूटस्थः निर्विकारः
एकाग्रचित्तः सन् त्रिरन्वीक्ष्य त्रिः वीक्ष्य सान्तकार्त्स्न्येन साकल्येन ब्रह्मवेदमन्वीक्ष्य विचार्य येनात्मनि हरौ रतिर्भ
वेत्तं निश्चितवान् ३४ ननु भूतेष्वेव रतिर्भवति अन्तर्भूते भगवति कथं रतिः स्यात्तत्राह भगवान्लक्षितः द्र
ष्टुः कथं स्वात्मना तेष्वेतानां तर्यामित्या केवलैर्दृश्यैर्बुद्ध्यादिभिः तैरेवद्रष्टा दर्शयतीति दृश्यानां जडानां बुद्ध्यादीनां द्र

ष्टृत्वान्यः शिवः कथं विशतः संस्तत्त्वविद् वासुदेवे भगवति यत्र क्रियायोगो यतो भवेत् ३३ भगवानब्र
ह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवान्सर्वभूतेषु
लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मना राजन्हरिः
सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ३६ पिबन्ति ये भगवत आत्मनः स
तां कथामृतं श्रवणपुटेषु संभृतं ॥ पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकं
३७ ॥ इति श्रीद्वितीयस्कंधे द्वितीयोध्यायः ॥ २ ॥

र्यानं स्वप्रकाशाद्द्रष्टारं विना नोपपद्यते अन्यथानुपपत्तिरूपत्वेन लक्षणैः स्वप्रकाशांतर्यामिलक्षकैः तथा बु
द्ध्यादीति कर्तृप्रयोज्यानि करणानि दात्रादिवदिति व्याप्तिसत्त्वेन अनुमापकैः स्वतंत्रकर्तृत्वेन सिद्धिरीश्वरसि
द्धिः ३५ यत एवं तस्माच्छ्रोतव्यमित्यादि प्रश्नोत्तरमुपसंहरति तस्मादिति ३६ श्रवणादिफलमभिनयेनाह पिबन्तीति
सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृतं विषयैर्विदूषितं मलिनीकृतमाशयं पुनन्ति शोधयं
ति तस्य चरणान्तिकं श्री विष्णुपदं व्रजन्ति ३७ ॥ इति श्रीभावार्थे द्वितीये द्वितीयः २ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९A

त्तीयेविष्णुभक्तेषुवैशिष्ट्यंशृण्वतोमुनेः भवतादेकोणातकर्मश्रवणादरईर्यते इदानीमन्यदेवताभजनस्यापिपु
त्रादिभजनवस्त्रवत्तुच्छफलत्वेनहेयत्वंवक्तुंपूर्वोक्तमनुवदतिएवमितिममनिकरादिदेवयोगेनमनुष्याणांश्लोकेमुनी
वेषुयेमनीषिणस्तेषांतत्रापिम्रियमाणाः तेषांविशेषतएवमेतदस्कियाश्रवणादिकंनिगदितंविहितमित्य

शुकः एवमेतन्निगदितंपृष्टवान्यद्भवान्मम नृणांयन्म्रियमाणानांमनुष्येषुमनीषिणां १
ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिं इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन् २ देवींमा
यांतुश्रीकामःतेजस्कामोविभावसुं वसुकामोवसून्रुद्रान्वीर्यकामोथवीर्यवान् ३ अन्ना
दिकामस्त्वदितिंस्वर्गकामोदितेःसुतान् विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशां
४ आयुष्कामोश्विनौदेवौपुष्टिकामइलांयजेत् प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ
५ रूपाभिकामोगंधर्वान्स्त्रीकामोप्सरउर्वशीं आधिपत्यकामःसर्वेषांयजेतपरमेष्ठिनम्

कामफलप्राप्त्यर्थमन्येषांदेवानांभजनमाह ६ ॥

र्थः १ ब्रह्मणस्पतिंवेदपतिंब्रह्माणं इंद्रियपाटवकामस्तुइंद्रंप्रजापतीन्दक्षादीन् २ मायांदुर्गांविभा
वसुंअग्निंवसुकामः धनार्थीवीर्यप्रभावः तत्कामोवीर्यवान्रुद्रान्यजेत् ३ अन्नाद्यंभोज्यंभक्ष्यंच
अदितेः सुतान्द्वादशादित्यान्विश्वान्देवान्प्रजानांसाधीनान्सिद्ध्यैयजेत ४ इलांपृथ्वींप्रतिष्ठा
स्यामादृच्छतिं रोदसीद्यावाभूमी ५ अप्सरसामुर्वशीवंतां ६ ॥

परमेष्ठिनंब्रह्माणंयथायजति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

10

श्री
भा० टि०
टी०
१०

मरु१

यज्ञेयज्ञोपाधिंविष्णुंकोशोवसुसंचयः वसुकामइतिधनमात्रमितिभेदः दांपत्यमन्योन्यप्रीतिः तदेवार्थो
यस्यसः ७ धर्मार्थःधर्मकामःउत्तमश्लोकोपाधिंविष्णुंतंतुंतन्वन्संतानवृद्धिमिच्छन् रक्षा[illegible]वाधानिवृत्तिः तत्का
मः पुण्यजनान्यक्षान् ओजोबलंतत्कामःमरुद्गणान्देवान् ८ राज्येराजत्वंतत्कामोमनून्मन्वंतरपालान्अ
नःकर्मणामंतत्कामोविश्वान्देवान्इति विशेषः अभिचरन्मारणमिच्छन्निर्ऋतिंराक्षसंकामकामःभो

मनून्चतुर्दश।

यजेद्यजेतयशस्कामःकोशकामःप्रचेतसं विद्याकामस्तुगिरिशंदांपत्यार्थउमांसतीं ७ ध
र्मार्थउत्तमश्लोकंतंतुंतन्वन्पितॄन्यजेत् रक्षाकामःपुण्यजनानोजस्कामोमरुद्गणान् ८ राज्य
कामोमनून्देवान्नैरृतिंत्वभिचरन्यजेत् कामंकामोयजेत्सोममकामःपुरुषंपरं ९ अका
मःसर्वकामोवामोक्षकामउदारधीः तीव्रेणभक्तियोगेनयजेतपुरुषंपरं १० एतावानेव
यजतामिहनिःश्रेयसोदयः भगवत्यचलोभावोयद्भागवतसंगतः ११

गेच्छुः अकामः वैराग्यकामः पुरुषंपरंप्रकृतिनिमित्तकोपाधिंईश्वरं ९ अकामएकांतभक्तः सकामःउक्तःउक्तमस
र्वकामोवापुरुषंपूर्णंनिरुपाधिं १० पूर्वोक्तनानादेवतायजनस्यापिसयोगएषकेनभक्तियोगफलत्वमा
ह एतावानितिइंद्रादीनपियजतांतत्तद्यजनेभागवतानांसंगतोभगवत्यचलोभावोभक्तिर्भवतीतिय
त् एतावानेवनिःश्रेयसस्यपरमार्थस्योदयः लाभः अन्यत्तुसर्वंतुच्छमित्यर्थः ११ १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भागवतेंद्रस्यैवेनस्यविता हरिकथारतिं स्तौति ज्ञानमिति यत्तया सक्तानां भवति कीदृशं आ सर्वतः प्रतिनिवृत्तं उपरतं
गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात् उत अत्र ज्ञाने आत्मप्रसादः यद्वा यत्र ययात्मनः प्रसादहेतुः गुणेषु वि
षयेष्वसंगो वैराग्यं च उभयं यत्रेति पाठे उभयं हास्वं वा गुणेष्वसंगः कैवल्यमित्येव संमतः पंथा यो भक्तियोगः निर्वृतः
श्रवणसुखेन प्राप्यज्ञाननिर्वृत इति वा तासु हरिकथासु को रतिं न कुर्यात् १२ अभिव्याहृतं उक्तं ऋषिं ब्रह्मलटक्रि

ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उभय यत्र गुणेष्वसंगः कैवल्यसंमतपथस्त्वथ भक्ति
योगः को निर्वृतो हरिकथासु रतिं न कुर्यात् १२ शौनक उवाच इत्यभिव्याहृतं राजा निशम्य भरत
र्षभः किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविं १३ एतच्छुश्रूषितो विद्वन्सूत नोर्हसि भाषितुं क
था हरिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै भागवतो राजा पांडवेयो महारथः बालक्रीड
नकैः क्रीडन्कृष्णक्रीडां य आददे १५ वैयासकिश्च भगवान्वासुदेवपरायणः उरुगायगुणोदाराः
सतां स्युर्हि समागमे १६ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवा
र्तया १७ ॥

एव उदर्कं उत्तरं फलं यासु ताः कथाः १

तं कविं पाहृत्वविस्नातं १३ श्रवणेच्छायां हेतुः हरिकथाः सतां भागवतानां सदसि सभायां स्युः १४ एतत्प्रपं
चयति स वा इति द्वाभ्यां कृष्णस्य ज्ञातादिरूपां कृष्णं यः स्वीकृतवान् १५ उरुगायगुणोदाराः महत्यः कथाः
स्युः १६ किं वा हृद्येवर्तीयमानाभ्यां गृहीतकथायां सफलं कुक्तविनाशायेना हविभिरायुर्हरतीति असौ सूर्य उ
द्यन् उद्यन्नस्तं च यन्गच्छन्नयं यत्क्षणो नीतः तस्य आयुः ऋते वर्जयित्वा सर्वमेव हरति १७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ द्वि॰
टी॰
११

ननुजीवनमेवतेषामायुषः फलमस्तिनत्वाहारादितरवइतिननुतेषांश्वासोनास्तिनहिभस्त्राश्चर्मकोषाः ननुतासामा
हारादिकंनास्तितत्राहनखादंतिनाश्नंतिनमेहंतिवेतः सकेमेथुनेऽजुंवंतिकिंतुतेग्रपितवाकारंपशुमत्वाग्रपरेइ
ति १८ तदेवाहश्वविड्वराहादिभिःसंस्तुतःसएषपुरुषपशुःयस्यकर्णपथंकदाचिदपिनागतःसःश्वविड्वराहादीनांतत्सखिभिः
करमलविषयासक्तत्वात्विड्वराहैर्ग्रामसूकरैःकंटकवृत्तैःस्वादविषयासक्तत्वात्उष्ट्रैःभारवाहित्वात्खरैः।
स्तुत्यइत्यर्थः १९ तस्यांगानिवनिष्फलानीत्याहबिलेइतिपंचभिःवतेतितवेरनश्रुणवतःश्रुणवतोन

तरवःकिंनजीवंतिभस्त्राःकिंनश्वसंत्युत नखादंतिनमेहंतिकिंग्रामपशवोऽपरे १८ श्वविड्वराहोष्ट्र
खरैःसंस्तुतःपुरुषःपशुः नयत्कर्णपथोपेतोजातुनामगदाग्रजः १९ बिलेबतोरुक्रमविक्रमा
न्येनश्रृण्वतःकर्णपुटेनरस्य जिह्वासतीदार्दुरिकेवसूतनचोपगायत्युरुगायगाथाः २० भारः
परंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदं शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंक
णौवा २१ बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये पादौनृणांतौद्रुमजन्मभाजौक्षे
त्राणिनानुव्रजतोहरेर्यौ २२ जीवञ्छवोभागवतांघ्रिरेणुंनजातुमर्त्योऽभिलभेतयस्तु श्रीविष्णुप
द्यामनुजस्तुलस्याःश्वसञ्छवोयस्तुनवेदगंधं २३

यस्ययेकर्णपुटैर्विलेइवासंथेनवेदुपगायतितस्याजिह्वाग्रसतीदुष्टादर्दुरोभेकस्तदीयाजिह्वेव २० पट्टेनवस्त्रो
ष्णीषेणतोकिरीटेनजुष्टमपियदिशिरोयदिननमेत्तर्हिकेवलंभारएवशावौमृतस्यकरौ तत्करवल्यौलसतोकंचनकं
कणौयथोस्तोग्रप्यपर्यवाशाहूः २१ येनयनेविष्णोर्मूर्तीर्निरीक्षतेतेबर्हायितेमयूरपिच्छनेत्रतुल्येद्रुमवज्जन्मभाज
तःत्रतुल्योइत्यर्थः २२ नाभिलभेतग्रभितोनसेवतेनतथायश्रीविष्णुपद्याःश्रीविष्णुपद्

प्रपन्नवत्सलो वलं कादित्वं यस्याविक्रियालक्षणं श्रयेति गात्ररुहेषु रोमसु हर्षेण उद्गमः यस्मादभक्तस्य सर्वं
मेतद्व्यर्थमतो मनोऽनुकूलं वचस्त्वं ब्रूहि अथ यतः साधु पृष्टः सन् वैयासकिः नृपतिं यदाह तदभिधेहीति २५
इति श्रीभावार्थदीपिकायां द्वितीये तृतीयोऽध्यायः ३ तुर्ये परीक्षिता पृष्टः सृष्ट्यादि हरिचेष्टितम् शुकेन ब्रह्म
नारदसंवादेनोपवर्ण्यते १ राज्ञः श्रीकृष्णकथायां तत्त्वप्रश्नेनैषा स्थितिमाह चतुर्भिः वैयासकेः शुकस्येति ए

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु
हर्षः २४ अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः यदाह वैयासकिरात्मविद्याविः
शारदो नृपतिं साधु पृष्टः २५ इति श्रीभागवते द्वितीये तृतीयोऽध्यायः ३ सूत उवाच वैयासके
रिति वचस्तत्त्वनिश्चयमात्मनः उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् १ आत्मजायासुता
गारपशुद्रविणबन्धुषु राज्ये चाविकले नित्यं विरूढां ममतां जहौ २ पप्रच्छ चेममेवार्थं यन्मां
पृच्छथ सत्तमाः कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ३ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गि
कं यतः वासुदेवे भगवति आत्मभावं दृढं गतः ४ राजोवाच समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवा
नघ तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ५ भूय एव विवित्सामि भगवानात्ममायया
यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६ ॥

वैयासकेः आत्मनस्तत्त्वनिश्चयो यस्मात् तद्वचः उपधार्य आकलय्य सतीं कृष्णे एव मेधां नान्यत्र इत्येवं धृताम् १
आत्मा देहः पशवो गजादयः २ इममेवार्थं हरिलीलालक्षणं ३ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं कर्म
संन्यस्य त्यक्त्वा आत्मभावं परमप्रेमाणं भगवदात्मत्वं गतः प्राप्तः सन् पप्रच्छ महत्तमः ज्ञानेन यपति नवक

यथतः समीचीनं ५ भूय एव वेदितुमिच्छामि इदं दुर्विभाव्यं अवितर्क्यं विश्वम् ६
यथा सृजति।

श्री
भा० टी०
२ १२

12

गोपायति

यथा सृजति पालयति संयच्छति संहरते पुरुशक्तिः बहुशक्तिमान् ७ क्रीडन्यथा करोति आत्मानं ब्रह्मादिरू-
पिणं क्रीडयन् विकरोति विविधं करोति ८ एकः पुरुषस्त्रीन्गुणान्युगपज्जन्मभिः ब्रह्माद्यवतारैः क्रमशो यथा प्रकृ-
तेर्गुणान्गृह्णीते ९ विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिंश्च अनुभवेन १० उपाम-

यथा गोपायति विभुर्यथा संयच्छते पुनः यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ७ आत्मा-
नं क्रीडयन् क्रीडन् करोति विकरोति वा नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः ८ दुर्विभाव्यमिवा-
भाति कविभिश्चापि चेष्टितम् यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ९ बिभर्ति भूरिशस्त्वे-
कः कुर्वन्कर्माणि जन्मभिः विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा १० शाब्दे ब्रह्मणि निष्णा-
तः परस्मिंश्च भवान्खलुः १० सूत उवाच इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः हृषीकेश-
मनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ श्रीशुक उवाच नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननि-
रोधलीलया गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने १२ ॥

न्त्रितः सन् प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ तत्रैवाह त्रयोदशभिः प-
रस्मै सर्वोत्तमाय तत्र हेतुः भूयसे अपरिमितमहिम्ने तदेव दर्शयति सतः प्रपंचस्य उद्भवादिषु निमित्तभूता
या लीला तया गृहीतं ब्रह्मादिरूपेणावतरणं त्रीणि शक्तित्रितयं येन तस्मै अन्तर्भवाय अन्तर्यामिणे अतए-
व सर्वान्तरत्वादनुपलक्ष्यं वर्त्म यस्य तस्मै ॥ १२ ॥
१२

12A

विविधफलदायकत्वमनुस्मरन्प्रणामति भूयः पुनस्त्वनमः सतांधर्मवर्तिनांस्तृजिनाखि देऽः खदूरैश्वसतामर्थप्र
णीलानांश्रमभवायस्त्रनुद्भवहेतवेऽखिलसन्त्वमूर्तयेतन्नदेवादिरूपेणाततन्नफलदायेत्यर्थः समग्रसन्नमूर्तये इ
तिवा पुनरपिपूर्वोक्तोभयवैलक्षण्यमाह पारमहंस्यप्रमुकनिष्ठारूपेश्राश्रमेव्यवस्थितानांपुंसामनुस्मरणं
प्रतानिवमेतेन पुनः पुनर्मोक्षंप्रदानमतत्तेतस्यदाशुषेदाये १३ माक्षतोभक्तानांनकर्षभायपालकायज्ञयोगि

वा।
भूयोनमः सद्धृजिनच्छिदेऽसतामसंभया।खिलसन्त्वमूर्तये पुंसांपुनःपारमहंस्यश्राश्रमेव्यवस्थितानां
मनुस्मरणदायकाय १४ नमोनमस्तेस्तुभायमानत्वाविहरकाष्ठायमुहुःकुयोगिनां निरस्तसाम्यातिश
येनराधसास्वधामनिब्रह्मणिरंस्यतेनमः १५ यत्कीर्तनंयत्स्मरणंयदीक्षणंयद्वंदनंयच्छ्रवणंयदर्हणं
लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः १६ विवक्षणायच्चरणोपसादना
त्संगंव्युदस्योभयतोंतरात्मनः विदंतिहिब्रह्मगतिंगतक्लमा स्तस्मैसुभद्र
श्रवसेनमोनमः १७॥
यस्ययदपेक्षया मन्यस्यहान्यमतिशायंरे
नोभक्तिहीनानांविहराकाष्ठादिगतियस्यदुर्ज्ञेयायेत्यर्थः तदेववैषम्यप्रतीतावपिनिर्दोषत्वायाविंत्यमैश्वर्य
माह निरस्तसाम्यंश्रतिशयस्तेनाखिलेनराधसायेश्वर्येणास्वधामनिस्वरूपेब्रह्मणिरममाणाय १८ सर्व
मायनेभ्योभक्तैःश्रेष्ठांस्त्वनुस्मरस्तृणामति यत्कीर्तनमितिद्वाभ्यां अर्हणंपूजनंसुभद्रमंगलंश्रवःयशो
यस्यतस्मै १९ विवक्षणाविवेकिनोयस्यचरणयोरुपसादनात् उपासनेभजनात्अंतरात्मनः संगः उभ
यत्रइहचपरत्रवसंगंव्युदस्यतिरस्यगतक्लमाः प्रयासरहिताः २०॥ मनसः।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

13

श्री भा॰ टी॰ २

भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमस्यति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मि
न्नर्पणं विना सुभद्रश्रवसे इति श्रवसा कीर्तिर्यशः श्रवणं वेः प्राधान्यमतापना १७ भक्तेः परशुद्धिहेतु
त्वं दर्शयन्नाह किरातादयो ये जातितः अन्ये च ये कर्मतः पापरूपाः यदपाश्रयाः भागवताः तदाश्रयाः स
न्तः शुध्यंति अतः प्रभावनामेवाकारादि विहरणनिपुण प्रभविष्णवे प्रभवनशीलायेति १८ सर्वोपास्यत्वमनुस्मरन्प्रार्थय
ते स एष आत्मात्मवतामधीशः आत्मारामाणामात्मा तेनोपास्य इत्यर्थः त्रयीमय धर्मादिविशेषणैस्तत्तन्मार्गेणोपास्य

पुलिंद२

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षेमं न विंदंति विना यदर्पणं तस्मै सुभ
द्रश्रवसे नमो नमः १७ किरातहूणांध्रपुक्कसा आभीरकंका यवनाः खसादयः येऽन्ये च पापा यदपाश्र
याश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः १८ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपो
मयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १९ श्रियः पतिर्यज्ञपतिः
प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्स
तां पतिः २० यदंघ्र्यभिध्यानसमाधिधौतया धियानुपश्यंति हि तत्त्वमात्मनः वदंति चैतत्कवयो य
थारुचं स मे मुकुंदो भगवान्प्रसीदतां २१ ॥

तं वितर्कितं गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यं अन्यास्त्वैर्येणावितर्क्यमीयं लिंगं मूर्तिर्यस्य स प्रसीदतु १९ सर्वपा
लकत्वमनुस्मरन्नाह श्रियः इति गतिश्च सर्वापन्निवारकः २० ज्ञानप्रदत्वमनुस्मरन्नाह यस्यांघ्र्योरनुध्या
नमेव समाधिः तेन धौतया शोधितया धिया यथारुचं रुच्यनुसारेण सगुणं निर्गुणं वा स्वमिदं यद्वा रुचं प्रतिभा यथा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

13A

सती।

किंच पुराकल्पादौ अजस्य हृदि सतीं विषयां स्मृतिं वितन्वता येन प्रचोदिता सरस्वती तस्य मुखतः किल प्रादुर्भूता स्वा
विलक्षणानि निःशेषाणि लक्षणानि यस्याः सा ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः २२ इदानीं स्ववाचं श्रोत्रजन्याद्यादि
नी संस्कारक कृष्णादिरूपो भाषार्थयति भूतैरिति स मे वचांसि अलंकृषीष्ट अलंकरोतु ते नन्वस्य वचसा मन्ये मालेका
रामे भवन्मायां कन्तस्यां तयामिना माविष्करोति यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पुरेषु तर्या ॥महता
मितया शेते वसति अत एव पुरुष मममाश्याप्रमाणानि तस्मात्पुरुष इति अत एव यः एकादशेन्द्रियाणि पञ्चभूतानि

प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणा
मृषभः प्रसीदतां २२ भूतैर्महद्भिर्य इमाः पुरो विभुः निर्माय शेते यदमूषु पूरुषः भुंक्ते गुणान्षोडश षोडशा
त्मकः सोलंकृषीष्ट भगवान्वचांसि मे २३ नमस्तस्मै भगवते वासुदेवाय वेधसे पपुर्ज्ञानमयं सौम्या यन्मु
खाम्बुरुहासवं २४ एतदेवात्मभू राजन्नारदाय विपृच्छते वेदगर्भोभ्यधात्साक्षाद्यदाह हरिरात्मनः
२५ इति श्रीभागवते द्वितीयस्कन्धे चतुर्थोध्यायः ४॥ व्यासपामितितेजसे ३

पान्सोडशगुणान कलाः भुंक्ते प्रकाशयति पालयतीति वा न दानात्मने पदमार्थ श्रवहेतुः यतः सोऽस्यानां
मात्मा वेतरि यताद्यार्थिकः न तत्र जीवन्मुक्तं तत्प्राप्यनाविरोधात २३ श्रीव्यासं नमस्करोति नम इति सौम्या।
भक्ता यस्य मुखाम्बुरुहस्यासवामकरेदमं २४ इदानीं प्रश्नस्योत्तरं तया ब्रह्मनारदसंवादं प्रस्तौति एतदि।
ति आत्मनि समयपवनवेदागर्भे यस्य साक्षाद्धरिर्यदाह २५ इति श्रीभावार्थदीपिकायां द्वितीयस्कन्धे चतुर्थो
ध्यायः ४ ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचपेनारदेनायएष स्रष्टादिवनामः हरेर्लीलांविस्तारेण हिंकालकर्मादिशक्तिभिः नारदायविष्णुतत्त्वेन
मोमध्यादित्युक्तेतत्रनारदप्रश्नमाह देवदेवेतिह्रेभूतभावन एतत्पवसर्वेषां पूर्वज इत्यनादेत्यापते न्नेनेतित्वां
तस्माथनेवतत्तद्वूहिजानीहि विशेषेणजानीयापयत्यर्थः कथंभूतमात्मतत्त्वंनितरां दर्शयतेयेनतत् उपलक्षणंभूत
विश्वमेवात्मतत्त्वानसमाधनंश्रुतस्तद्विपोषमेश्वरेति यद्रूपंयेनदृश्यतेप्रकाशयतेयदधिष्ठानंयदाश्रयंयतः ये
नसृष्टंयत्तस्यस्मिल्लीयतेयत्परंयदधीनंयच्चेतियदात्मकंयतः सकारणतोवेत्यर्थः तस्यतत्त्वंयथार्थं

श्रीनारदउवाच ॥ देवदेवनमस्तेस्तुभूतभावनपूर्वज तद्विजानीहियज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपंयद
धिष्ठानंयतःसृष्टमिदंप्रभो यत्संस्थंयत्परंयच्चतत्तत्त्वंवदतत्त्वतः २ सर्वंह्येतद्भवान्वेदभूतभव्यभवत्प्र
भुः करामलकवद्विश्वंविज्ञानावसितंतव ३ यद्विज्ञानोयदाधारोयत्परस्त्वंयदात्मकः एकःसृज
तिभूतानिभूतैरेवात्ममायया ४ आत्मन्भावयसेतानिनपराभावयन्स्वयं आत्मशक्तिमवष्टभ्य ऊ
र्णनाभिरिवाक्लमः ५ ॥ टि

तत्त्वतोवद २ नन्वनामीतिनवक्तव्यमित्याह सर्वमिति भूतंजातंभव्यंजनिष्यमाणंभवद्वर्तमानंयस्मात्तेनेषां प्र
भुर्यतः अतःविशिष्टज्ञानेनावसितंनिश्चितं ३ आस्तामिदंआदौतावदहमेवकथयेत्याह यतोविज्ञा
नंयस्यकस्तत्वविज्ञानमित्यर्थः यदाधारः कोत्तवाश्रयः यत्परः यदधीनः यदात्मकःयत्स्वरूपः ४ समतत्व
मेवस्वतंत्रः एषमेश्वरः इतिबुद्धिःतत्त्वंपश्यतोनत् परशंकयाप्रकामित्याहसार्धैश्चतुर्भिः आत्मनिभावय
सेपालयसिसृजसिमेवपराभवमप्राप्यतत्स्वक्लमःश्रमरहितः ययोर्णनाभिरात्मनएवशक्तिमवष्टभ्य

श्री भा० टी० ५

स्कं २ अ० ५ ५

14A

नवेद नजानामि सर्वं त्वंमेढ त्यर्थः १

दत्वा १

तस्मात्तत्रइदंब्रह्मस्मिन्विश्वस्मिन्परमुत्तमं अपरंचयत्संसमंमुख्यमंवैवत्वापिनाममनुष्यादिरूपंद्विविदिग्
णः पृष्टोमादितेभ्योवसाध्यंतत्रापिमदसनस्थूलसूक्ष्मंच किंचिदप्यतोनवेद किंत्वन्नः एवसर्वंभ
वतीतिमन्ये सतयाविद्योपिभवानतपो चरत्तदितियततेननोस्मानखेदयसेमोहयसियतः परांशोका
द्वयोस्तत्त्वंकोपिप्रयच्छसि यद्वैवाहंतयानुपासितः शिक्षितः सन्बुध्येबुध्येयंतयोर्विशेषेणविज्ञाय विजानीहि ४
य ८ प्रश्नयसिनेदति हेवत्सपुत्रत्वंद्विविकित्सितंसेदहः तत्रैवकः प्रश्नोयंसम्यगित्यर्थः यतः कारु

नाहंवेदपरंह्यस्मिन्नापरंनसमंविभो नामरूपगुणैर्भाव्यंसदसत्किंचिदन्यतः ६ सभवानचरद्घो
रंयत्तपःसुसमाहितः तेनखेदयसेनस्त्वंपराशंकांप्रयच्छसि ७ एतन्मेपृच्छतःसर्वंसर्वज्ञस
कलेश्वर विजानीहियथैवेदमहंबुध्येनुशासितः ८ ब्रह्मोवाच सम्यक्कारुणिकस्येदंव
त्सतेविचिकित्सितं यदहंचोदितःसौम्यभगवद्वीर्यदर्शने ९ नानृतंतवतच्चापियथामांप्र
ब्रवीषिभोः अविज्ञायपरंमत्तएतावत्त्वंयतोहिमे १०॥

णिकस्यतवायंप्रश्नः यद्यहंतेनः यतस्ततः परमपुरुषस्यभगवद्वीर्यप्रकाशनेप्रवर्तितोस्मि अतस्त्वंजिज्ञासस्वपि
सर्विकृपालोवत्सेनत्वानित्यर्थः ९ ननुत्वमेवभगवानित्युक्तंमेतयापकः सत्यंनसिभूतानित्वादिनामसत्यंय
यामीहंस्वरूपेणनपुत्राश्रमेनाटपितिवभावणंनास्तितमन्तंयतः कारणात् एतावत्त्वंभावस्यभावः एतावा
त्वंमेत्रस्ति किंतुमनः परमीश्वरमविज्ञायर्भूतंयतः कोवाविनाएतोब्रूषे अतः साहस्यपालवेयंभ्रांतिर्भव
तेबुद्धिएवंमन्त्वामित्यर्थः यतईश्वरादाममेतावत्त्वंमविज्ञायेतिवान्वयः १०॥

त१

15

श्री भा॰ द्वि॰ टी॰ १८

नहि कोमावीश्वर इत्यपेक्षायां भक्त्या नमः कुर्वन्नेव तं कथयति त्रिभिः येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रका
शयामि सृष्टमभिव्यक्तं करोमि यथार्कादयस्तेन प्रकाशमेव प्रकाशयंति तथाच श्रुतिः न तत्र सूर्यो भाति न च
न्द्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ११ तस्मै नमो
धीमहि यस्य मायया मोहिताः संतो गुरुं प्रसादयो मां जगद्गुरुं जगत्कर्तारं वदंति तस्मै यन्माययेति मायां सर्व
धा जेतुमशक्या दुर्जयया लोकेश्वरं तस्यापि किं मोक्षसंसारस्तेनैव तस्याह सकपटमसौ नानातीति १२ यस्य ह्रेपि

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं यथार्कोग्निर्यथा सोमो यथार्क्षग्रहतारकाः ११ तस्मै नमो
कैसाध्यक्रियाफलवानक थमनस्स्वरूपंतस्येत्यतआह अत्र बहुकारकसाध्यः क्रियार्थः उत्पाद्याप्यविकार्यसंस्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति इंद्रियैर्ज्ञानांशाभिव्यक्ति [redacted] वि वक्रियाभिरानंदांशाभिव्यक्तिर्यते नोत्पत्त्यादिकमिति भावः ननु त्पत्त्याद्यभावेपि मायामलापाकरणेन विकार्यत्वं स्यादेव व्रीहीणामिव तुषाकरणेनेत्याशंक्याह मायाभिमुखे स्यात् विलज्जमानेव यस्मात्परेतिष्ठते तोपसरति ४७ तस्मादेवंभूते भगवति यमितमनसा कृतार्था भवन्ति मपि कृत्यमस्तीत्याह सद्वैवतीतिसप्त्यर्थः सह चरमनः यं प्रति नियम्य यस्मिन् स्थिरीकृत्य तं तं योय त्वाशीलाः कर्मभेदः तन्नियमः अवृत्तः तद्यद्वेति साधनं जह्यः त्यजेयुः अत्र उपयोगाभावे न त्याज्यतादिरिते इत्यर्थः उपयोगाभावे न साधनानादरे दृष्टांतः निपीयते स्मिन्निति निपानं कूपः तस्य खनित्रं खनितसाधनं यथा स्वराट् स्वयमेव प

[illegible]

मात्रैकि

य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

28A

एवं तावदन्तसमुच्चितं विष्णोः कं वैभवमाह ततः स्वरूपं तत्त्वामानां च प्राप्यं कृत्यं वा न किंचिदिरस्तीति केदं इदानीं ततः आकल्प
फलदातामेकमर्थप्रवर्तकः वेत्याह स एव श्रेयसां फलानां विभुः दाता पि वेत्ति हेतुः भावानां ब्रह्मणादीनां स्वभा
वैः प्रामदमादिभिर्विहितो विहितस्य सतः शुभस्य कर्मणो यतः प्रवर्तकात्प्रसिद्धिः यद्वा भावानां ब्रह्मादीनां
स्वभावेन परिणामेन विहितस्य सतः कार्यस्य प्रसिद्धिः स एव स्वर्गादीनां दातेत्यर्थः ननु कर्म कर्तृत्वे सत्यस्य कर्तृ
स्वर्गादिफलं स्यात्तत्राह स्वदेहारम्भकधातूनां भूतानां विगमे वियोगे नेमति अनुविशीर्यमाणे पि देहे तत्र स्थि

स श्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्रसिद्धिः देहे स्वधातुविगमेनुविशीर्य
माणे व्योमेव तत्र पुरुषो न विशीर्यते जः ४८ सोयं तेभिहितस्तात भगवान्विश्वभावनः समासेन हरेर्ना
न्यस्मात्सदसच्च यत् ४९ इदं भागवतं नाम यन्मे भगवतोदितं संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ५०
यथा हरौ भगवति नृणां भक्तिर्भविष्यति सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ५१ मायां वर्ण
यतोमुष्य ईश्वरस्यानुमोदतः शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ५२ ॥ इति श्रीभागवते द्वि
तीये सप्तमोध्यायः ७ ॥

व्योमेव यः तेन सह न विशीर्यते तथा तः अजस्तेन सह न जातेः तस्य पुरुषस्य जीवस्य श्रेय
स्त्वात्प्रभुरित्यर्थः ४८ अध्यायत्रयस्यार्थमुपसंहरति सोयमिति समासेन संक्षेपेणाभिहितः तमेवाह सत्कार्यं कारणं
च हरेरन्यत्त न भवतीति ननु हरेरन्यद्व्यतिरेके तद्वत्त्वविकारप्रसंगः स्यात् न अन्यस्मात्कारणात्स्वतो हरिः कार्याद्व्यति
रिक्त इत्यर्थः ४९ अयं च विभूतीनां संग्रह उदितः ५० यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य संवि
स्तरं तथा च हरिलीलाप्राधान्येन श्रीभागवतं वर्णय न तु भक्तिरसविद्यातेन केवलं तत्त्वमित्यर्थः ५१ ननु
लीलामायाश्रया किं तद्वर्णनेनेत्यत आह मायामिति ५२ इति श्रीभावार्थदीपिकायां द्वितीये सप्तमोध्यायः ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द्वि० टी० २९

अष्टमे देवमेवं यथा माद्विपत्रीभिर्नीवयोः बहून्यरीक्षिदाप्रष्टव्यसुराणामर्थानवबुभुत्सितान् स्वमेतद्विपुलीकुर्विन्नत्वं
तदेव विपुलीकरणं प्रष्टव्यमिति ब्रह्मणेति त्रिभिः अगुणस्य गुणाख्याने तस्यापि देववद्दर्शनं यस्य सः १ निःसंगं मनः
श्रीकृष्णे निवेश्य त्यक्ष्ये यथा ... दर्शितः सोपि श्रद्धया शृण्वतां नाल्पकालेनेत्याह शृण्वत इति ३ स्वप्रयत्नं विना
भगवान्स्वयमेव हृदि विशतीति ४ भावसरोरुहं हृदयकमलं प्रविष्टः तत्स्थं हृदयगतं सर्वं मलं धुनोति सलिल
स्येति दृष्टान्तस्याभिप्रायः आदिनाऽंभस्य जलेऽशुध्यनेन तदेव केवलं शुध्यति न तु नदीतडागादिगतं सच मलः ऽंभ

राजोवाच॥ ॐ ब्रह्मणा चोदितो ब्रह्मन्गुणाख्यानेऽगुणस्य च यस्मै यस्मै यथा प्राह नारदो देवदर्शनः १ ए
तद्वेदितुमिच्छामि तत्त्वं तत्त्वविदां वर हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः कथयस्व महाभाग यथा
हमखिलात्मनि कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं ३ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचे
ष्टितम् कालेन नातिदीर्घेण भगवान्विशते हृदि ४ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धु
नोति शमलं कृष्णः सलिलस्य यथा शरत् ५ धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति मुक्तसर्वपरि
क्लेशः पांथः स्वशरणं यथा ६॥

स्योतः शरदि तिष्ठत्येव नतु सर्वथा विलीयते अतएव किंचिच्चलनेन पुनः दृश्यते एवं तपोदानादिप्रायश्चित्ते
न सर्वथा सर्वेषां सर्वपापं धुनोति किंतु सावशेषं तच्च कस्यचिदेव किंचिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वं
पापं निःशेषं हरतीत्यनेन दृष्टान्तेनोक्तं सलिलस्य मलं यथा शरदिति ५ ततः स कृतार्थो भवतीत्याह धौता
त्मेति पान्थः मुक्तसर्वपरिक्लेशः पान्थः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति त
द्वत् ६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२९A

तस्वेवं भवतो नस्वकांग्राति सृष्टव्यमेतदृशानमर्थान्पृच्छति अथात्मनः धात्त्रो भूतानि तत्स्वेवं युक्तमपपद्यते लौकिकस्यात्मनः
धातुभिर्देहारंभदर्शनात् यदेतत् किंरूपमिति ननु किंरूपेणानतिक्रममित्यादि यदेतन्नाडीनाकर्मादिना भवतो यथावन्ननाते अतः कथं पृथ्विति
तिशेषः २ यः प्राणस्थः सोम्यनमप्यल्पदेहा वाच्योक्ताः अतस्तस्य को विशेषः इत्याशयेन पृच्छति आसीदिति
मार्थेन लोकानां संस्थानं वदनात देवलदात्मा स्वरूपं यस्य तत्स्वरूपं पस्योदवाद्यासीत असावीस्वरस्य नापूर्के।
स्वपरिमितेरवयवैः अपरलौकिकः पुरुषो यावानासीत्स्वेकावयवपुरुषः तावानेवोक्तः संस्थावान् अवं वा
पर्व

पद्धातुमतो विराजन्देहारंभो स्वधातुभिः यदात्मयादेवनाबभूवं नानानते यथा ७ आसीद्यदुदरा
त्पद्मं लोकसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः स्थितः ८ तावानसाविति प्रोक्तः
संस्थावयववानिव अतः स्वनतिभूतानि भूतात्मा यद्गुणग्रहात् ९ द्रष्टव्योऽयेन रूपेणाधिप
द्मसमुद्भवः सर्वाण्यपि यत्र पुरुषो विश्वस्थितिद्भवाप्ययः १० स्वकाल्ममायां मायेशः शेते सर्वे
गुहाशयः पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ११ लोकैरमुष्यावयवाः सपालैरिति
शुश्रुम ११ ५ यस्य भगवतो गुणगृहात्मविसृजति सृजति भूतात्मा चभवति येन वृत्पदाणात्स्वरूपं द्रष्टव्यो नाभिपद्म

नरवच प्रोक्तः अतः को विशेषः तस्य ति ८ अवस्थपेव विशेषो वाच्यः इत्याह अतो ब्रह्मणोऽभूतानां
अस्य स्वाधीनो ग्रामात्मानियन्तास्य स्वरूपाधिकात् येन ना रायणस्यानाशृङ्खलानस्य रूपं द्रष्टव्योऽद्रष्टवान् एतच्च
तस्यापि दृष्टश्रीपस्य सृष्टस्य स्यात्किंतत्मनः स्वतंत्रत्वापि सर्वोह मीदृग्यैवाभिवादितं इत्यादिनोक्तम
नयते अतस्तस्य स्वरूपं भविष्यति ९ अप्रोतस्माह सर्वाणीतियत्र शेते येन रूपेणावातिष्ठते विश्वस्य
स्थित्यादयो यस्मात् पद्ममूदिश्वानोनतत्तोऽहस्मादाह तुम्मिति सर्वोत्तेक्रियायाः संबंधः १० अस्मात
दमाह पुरुषस्यावयवैः पूर्वकल्पिताः यस्य हावयवैः लोकान्कल्पयन्तीत्यादौ लोकेरमुष्याव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

[Right margin, vertical:] स समुद्भवः कारणं सर्वं कार्यं तावानिति स्पष्टार्थः ।१

30

श्री
भा॰टि॰
टी॰
३॰

इदानीमनुक्तानर्थान्बहून्पृच्छति यावानित्यादिना कल्पोवांतरः महांकल्पोवांतरः भूतादिशब्दोयस्मात्तस्य वाच कइतिवा सतः स्थूलदेहाभिमानिनोमनुष्यपितृदेवतादेः आयुषः प्रमाणप्रकारःइष्टः १२ विशेषेणेच्छतीति कालस्येति अनुगतिप्रवृत्तिः कर्मगतयःकर्मप्राप्यानिस्थानानियादृशीःयादृश्यः १३ गुणानांसत्वादीनांपरिणामंदेवतादिरूपंप्रादेशहेतेनमनुष्यादिरूपमिच्छतांगुणिनांजीवानांमध्येयस्मि

यावान्कल्पोविकल्पोवायथाकालोनुमीयते भूतभव्यभवच्छब्दआयुर्मानंचयत्सतः १२ कालस्यानुगतिर्यातुलक्ष्यतेण्वीबृहत्यपि यावत्यःकर्मगतयोयादृशीर्द्विजसत्तम १३ यस्मिन्कर्मसमावायोयथायेनोपगृह्यते गुणानांगुणिनांचैवपरिणाममभीप्सताम् १४ भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां सरित्समुद्रद्वीपानांसंभवश्चैतदोकसां १५ प्रमाणमंडकोशस्यबाह्याभ्यंतरभेदतः महतांचानुचरितंवर्णाश्रमविनिश्चयः १६ अवतारानुचरितंयदाश्चर्यतमंहरेः युगानियुगमानंचधर्मोयश्चयुगेयुगे १७ नृणांसाधारणोधर्मःसविशेषश्चयादृशः
श्रेणीनांराजर्षीणांचधर्मःकृच्छ्रेषुजीवताम् १८॥

न्परिणामेकर्मणांगुणत्रया पानांसमवायःसमुदायः
केनकर्मसमुदायेनकयंकृतेनकोधिकारीदेवादिभावंप्राप्नोतीत्यर्थः १४ भूपादीनांसंभवःएतन्निवो कांसि गृहाणियेषांप्राणिनांतेषांचसंभवः यश्चेतिसर्वत्रानुषंगः वर्णानामाश्रमाणांचविनिश्चयःतत्त्वभावेनिर्धारः १६ युगेयुगेप्रतियुगेयोधर्मःयश्चहरेरवतारानुचरितं १७ सविशेषःवर्णाश्रमनिर्बंधनःश्रेणीनांतत्तद्व्यवसायोपजीविनांव्यवहारनियमलक्षणोधर्मः राजर्षीणांप्रजापालनाधिकारिणां

२॰

30A

सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं तत्र कार्यं हेतुत्वेन लक्षणमित्यर्थः पुरुषाराधनस्य विधिः देवपूजाप्रकारः अष्टांगयोगविधिः १९ योगैश्वर्याणामैश्वर्याणामणिमादीनामर्चिरादिगतिः लिंगस्य शरीरस्य भंगः प्रलयो ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्मो धर्मशास्त्राणि एषां इतिहासपुराणयोश्च गतिः २१ संप्लवः अवांतरप्रलयः यद्वा सम्यक् कल्पनेन उद्भवः विक्रमः स्थितिः प्रतिसंक्रमः महाप्रलयः इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवतायतनानि च अत्र श्लोकः आरामः पूर्तमित्यभिधीयते तत्र

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च १९ योगै
श्वर्यगतिर्लिंगभंगस्तु योगिनाम् वेदोपवेदधर्माणामितिहासपुराणयोः २० संप्लवः सर्वभू
तानां विक्रमः प्रतिसंक्रमः इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः २१ यश्चात्मानुशायिनां सर्गः
पाषंडस्य च संभवः आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः २२ यथात्मतंत्रो भगवान्विक्री
डत्यात्ममायया विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः २३ सर्वमेतच्च भगवन्पृच्छते मेऽनुपू
र्वशः तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने २४ अत्र प्रमाणं हि भवान्परमेष्ठी यथात्मभूः परे चेहा
नुतिष्ठंति पूर्वेषां पूर्वजैः कृतम् २५ ॥

वकाम्यानां अग्निहोत्रादीनां विधिः अविरोधप्रकारः २१ अनुशायिनां लीनोपाधीनां जीवानां आत्मनो जीवस्य व्यवस्थानं बंधमोक्षाविति विकल्पस्वरूपेणावस्थानं २२ उदास्ते प्रलये वशाच्छारस्य एव तथापि २३ प्रमाणं सम्यक् ज्ञाता यतस्त्वं ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति अस्मात् न्यायेनाह परे चेति यद्वा इतः परेऽप्यायत्या गतानुगतिका अपवनतत्त्वविदः इत्याह परे चेति २५ पूर्वेषां पूर्वजैः यत्कृतं तत्परे अनुतिष्ठंति अनुगच्छंति आद्यपद्यद्वयस्य पूर्वैव टीका अन्यास्तु न लिखिता न व्रतवान्न्या

नहि तत्कोपपर्यायमनुलस्य कृतः प्रकारांतरमाहनेति २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

31

श्री॰ भाटि॰ टी॰ ३१

नवरासंनिनायगच्छेतिनत्याकलीभवेतित्यर्थः प्रवृत्तकीर्तिपीयूषं पिबतः २२ उपामंत्रितः पृष्टः सत्रोमोपाति
ष्ठितस्य २८ ब्रह्मकल्पेऽस्मदुपक्रमकेल्पे भागवताख्येनैवप्रश्नानामुत्तरदानमुपक्रांतवानित्यर्थः २९ पांडू
नामृषभः श्रेष्ठः आनुपूर्व्येणातिशयक्लावक्रमोत्रविवक्षितः नतुश्रक्रमः ३० इतिश्रीभावार्थद्वितीयस्कंधे ८
मोध्यायः ८॥ सत्रप्रश्नोत्तरंवक्तुंब्रह्मणोहरिणोदितम् कथयामासनवमेशुकोभागवतंपुनः तत्रता
वद्युक्तंयदध्यात्मतःत्वेनेनजीवस्यकथंदेहसंबंधइति तत्रोत्तरमाह आत्मनोहरेर्मायांनंतरेणाश्रुतभवद्र

नमेसवःपरायंतिब्रह्मन्ननशनादमी पिबतोच्युतपीयूषमन्यत्रकुपिताद्द्विजात् २७ सूतः सउपामं
त्रितोराज्ञाकथायामितिसत्पतेः ब्रह्मरातोभृशंप्रीतोविष्णुरातेनसंसदि २८ प्राहभागवतंनाम
पुराणंवेदसंमितं ब्रह्मणेभगवत्प्रोक्तंब्रह्मकल्पउपागते २९ यद्यत्परीक्षिदृषभःपांडूनाम
नुपृच्छति आनुपूर्व्येणतत्सर्वमाख्यातुमुपचक्रमे ३० ॥इतिश्रीभागवतेद्वितीये ८ मोध्यायः
८ शुकः॥ आत्ममायामृतेराजन्परस्यानुभवात्मनः नघटेतार्थसंबंधःस्वप्नद्रष्टुरिवांजसा १
बहुरूपइवाभातिमाययाबहुरूपया रममाणोगुणेष्वस्याममाहमितिमन्यते २ यर्हिवावमहिम्नि स्वे
परस्मिन्कालमाययोः रमेतगतसंमोहःत्यक्त्वोदास्तेतदोभयं ३॥

परस्यात्मनःशुद्धस्यैनदृष्टस्येनदेहादिनासंबंधःस्वप्नस्यतज्ज्ञतोनघटेतश्चयद्देहेतुःपरस्यतित्ससद्दृष्टुर्यथास्वप्नदे
हसंबंधोनघटतेतद्वत् संसारोपिमाययेवेत्याह १ बहुरूपोबालयुवादिरूपोदेवमनुष्यादिरूपश्चआभाति
गुणेषुदेहादिषुप्रत्नपवभक्तियोगेनततिरामेसतिमोतोघटतेरत्यतत्राहयर्हीति २ वावशब्दएवार्थस्व
एवमहिम्निपरस्मिनततदेवाह कालमाययोः प्रकृष्टत्वेपरस्मिन्नतदाउभयंप्रहंममेतिचोक्ताउदास्ते
एवंस्वरूपेणावतिष्ठते तदुक्तं ययासंमोहितोजीवआत्मानंत्रिगुणात्मकंपरोपिमनुतेनर्थंतत्कृतंचाभि

[illegible]

यथोक्तंपरमेश्वरस्यापिदेहसंबंधाविशेषात् कथंतद्भक्त्यामोक्षःस्यादित्याशीघ्रदुदराज्यमित्यादिना तत्राह १८

31A

आत्मनोजीवस्यतत्त्वविशुद्ध्यर्थंतत्त्वज्ञानार्थंतद्भवत्वेवंकिंतत् यत्तपआदिनाभजनेभगवान्ब्रह्मणोऽग्राह किंकु
र्वन्रूपंतेमतोचिंतयन्रूपंदर्शयन् दर्शनेहेतुः अव्यलीकेनव्रतेनतपसाआदृतः सेवितःसन् अयंभावः जीव
स्याविद्ययामिथ्यादेहसंबंधः ईश्वरस्यतुयोगमाययाविहितलीलाविग्रहाविर्भाव इति महान्विशेषः अ
तस्तद्भजनान्मोक्षोपपत्तिरितिभगवद्भजनादेवतत्त्वज्ञानमितिप्रपंचयिष्यन् ब्रह्मणोपितत्त्वज्ञानंतत्प्रसादा
देवेतिदर्शयितुमितिहासमाह सइत्यादिना ४ परोगुरुः भक्तिरहस्योपदेष्टा स्वधिष्ण्यंपद्ममास्थाय अधि

आत्मतत्त्वविशुद्ध्यर्थंयदाहभगवान्ऋतं ब्रह्मणेदर्शयन्रूपमव्यलीकव्रतादृतः ४ सआदिदेवोजगतां
परोगुरुःस्वधिष्ण्यमास्थायसिसृक्षयैक्षत तांनाध्यगच्छद्दृशमत्रसंमतांप्रपंचनिर्माणविधिर्ययाभवे
त् ५ सचिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितंवचोविभुः स्पर्शेषुयत्षोडशमेकविंशंनि
ष्किंचनानांनृपयद्धनंविदुः ६ ॥

ध्यायतस्याधिष्ठानात्तेषाम्नायपूर्वंजलेनिमग्नः पश्चात् परावृत्तःस्वधिष्ण्येस्थितइत्यर्थः ऐक्षतनकयैसृष्टवंइत्यालो
चितवान् तांदृशंप्रज्ञामेवसृष्टिविषयेसम्यग्नामव्यभिचारिणीविधिः प्रकारः सृष्टिंचिंतयन् कदाचित्
द्व्यक्षरंवर्णद्वयंअंभसिउपाशृणोत् उपसमीपेश्रुतवान् तेअक्षरेदर्शयति कादयोमावसानाः स्पर्शाः
तेषुषोडशंतकारः एकविंशंपकारः वचसोविशेषणार्थमाह हेनृप निष्किंचनानांत्यक्तधनानांयद्धनं
यद्विदुः येनतपोधनाइतिप्रसिद्धाः तच्चद्विर्गदितेतपतपेति लोटामध्यमपुरुषैकवचनं तस्यवीप्सयोक्ता
दरंविधित्वामश्रुत्योदित्यर्थः २ एवंवैवटीकास्य ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० टी० ११

एवं विचार्य तद्वचो वक्तारं दिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनाविवक्तव
त्तेनित्युक्तार एव तत्र आत्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः ७ ततश्च समस्तविलानां लोकानां तापनं प्रका
शकं तपश्चतप्यत तप्तवान् तपतेव मम वचो मोघं स्यादिति अमोघदर्शनः यस्मात् जितः अनिलश्चात्मा मनश्च येन विजि
तानि उभयेंद्रियाणि ज्ञानकर्मात्मकानि येन तपतां तपः चरतां मध्ये तपीयान् अतिशयेन तपस्वी ८ तस्मै
ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठं न यत्परं यतः परमन्यदुत्कृष्टं नास्ति तमेव लोकमनुवर्णयति पंचभिः

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्यु
पादिष्ट इवादधे मनः ७ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः अतप्यत
स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ८ तस्मै स्वलोकं भगवान्सभाजितः संदर्श
यामास परं न यत्परम् व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ९ प्रवर्तते
यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरा
र्चिता १० श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः सर्वे चतुर्बाहव उ
न्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ११ ॥

व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः स्वगुणवद्भिः यद्वा स्वस्वरूपदर्शनमस्ति येषामात्मविद्भिरित्यर्थः ९
तामस्योर्मिश्रं सत्त्वं न प्रवर्तते किं तु शुद्धमेव सत्त्वं कालविक्रमो नाशः अपरे रागलोभादयो न संतीति किमुत
वक्तव्यं अनुव्रताः पार्षदाः १० श्यामाश्चावदाताश्च पद्मनेत्राः पीतांबराः सुरुचः अतिकमनीयाः सुपेशसः सुकु
मारा उन्मिषंतः प्रभावंतो मणिप्रवेका मणयश्च श्रेष्ठा येषु तानि निष्काणि पदकानि आभरणानि

३५A

प्रवालादिवद्वैदूर्यवर्णो येषां ते परिस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां पार्षदाननुवर्ण्य पुनरपि लोक
मनुवर्णयति भ्राजिष्णुभिर्दीप्यमानाभिः १२ प्रमदोत्तमानां दिवः कांतयः ताभिः विद्योतमानः सह विद्यु
द्भिर्वर्तमाना अभ्रावलिविद्युतः ताभिरभ्रावलिभिः नभ इव विद्युतस्त्रियः १२ अभ्रपंक्तयश्च ते विमानानि नभ इव
लोकः श्रीः सरूपवती रूपिणी मूर्तिमती मानं पूजां विभूतिभिर्नानाविभवैः १३ प्रेंखं स्वान्दोलनं संश्रिता कुसु

प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः भ्राजिष्णुभिर्यः परितो विराजते लस
द्विमानावलिभिर्महात्मनाम् १२ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः
श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः १३ प्रेंखं श्रिता या कुसुमाकरानुगैर्वि
गीयमाना प्रियकर्म गायती ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं १४ सुनं
दनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् भृत्यप्रसादाभिमुखं दृगासवं प्रसन्न
हासारुणलोचनाननम् १५ अर्ध्यार्हणीयासनमास्थितं परं वृतं चतुःषोडशपंचशक्तिभिः कि
रीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया १६ ॥

परिसेवितमादरेण हस्सेवनं २

माकरो वसंतः तस्यानुगा भ्रमरास्तैर्विविधं गीयमाना स्वयं तु प्रियस्य हरेः कर्माणि गायती भवति १४ एवं
भूते लोके तत्र तस्मिन् भृत्यानां प्रसादे अभिमुखं दृगेवासवः हृष्णुणो हर्षकरः प्रसन्नहासेनारुणलोचनाने
न आननं यस्य १५ वक्षसि स्थितया श्रिया लक्षितं मलंकृतं अर्ध्यार्हणीयं वरिष्ठं सिंहासनं च
तस्य प्रकृतिपुरुषमहदहंकाररूपाः षोडशधा एकादशेन्द्रियाणि महाभूतान्याख्याः पंचतन्मात्ररूपाः याः शक्त

दः महिम्न ३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

33

श्री भाग द्वि° २२

स्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः इतरत्र योगिष्वध्रुवैरागन्तुकैः साधारणैरित्यर्थः एवंभूतैरपि स्व एव धामन् स्वरूप एव
रममाणं न प्रपञ्चे ईश्वरं तस्य दर्शनेन य आह्लादः तेन परिप्लुतमन्तरं मनः अन्तःकरणं यस्य हृष्यन्ती रोमाञ्चिता तनुर्यस्य
प्रेमभरेणाश्रूणि लोचनेषु यस्य १७ विश्वसृड् ब्रह्मा पारमहंस्येन पथा ज्ञानमार्गेण १८ तं ब्रह्माणं भगवान् बभाषे प्र
जासर्गकार्ये निजशासनमर्हतीति तं सनियोगार्हमित्यर्थः प्रजाविसर्गे समुपस्थितमिति वान्वयः ईषत्स्मितेन शोचिषा दीप्त्या
प्रभायुक्तया गिरा तयाहं तोषितोऽस्मि त्वयाहं तेन र्भ १९ चिरं संभृतेन तपसा अहं सम्यक् तोषितः दुस्तोषः तोषयितुमशक्यः २०

हे वेदगर्भेति हृत्कोशधयन वेदान्संचापयति।

युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरं तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेम
भराश्रुलोचनः १ ननाम पादाम्बुजमस्य विश्वसृक् यत्पारहंस्येन पथाधिगम्यते १८ तं प्रीयमाणं समु
पस्थितं तं प्रजाविसर्गे निजशासनार्हणम् बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः
करे स्पृशन् १९ श्रीभगवानुवाच तयाहं तोषितः सम्यग्वेदगर्भ सिसृक्षया चिरं भृतेन तपसा
दुस्तोषः कूटयोगिनाम् २० वरं वरय भद्रं ते वरेशं माभिवाञ्छितम् ब्रह्मञ्छ्रेयःपरिश्रामः पुंसाम
द्दर्शनावधिः २१ मनीषितानुभावोऽयं मम लोकावलोकनं यदुपश्रुत्य रहसि चकर्थ परमं तपः २२

मा इति मां श्रेयसां फलानां परिश्रामः साधनप्रयासः मद्दर्शनमवधिर्यस्य स तथा नातोऽधिकं तेन पुनः फ
लमस्तीत्यर्थः एतत्त्वं मत्कृपयैव नतु यागात्प्राप्तमित्याह २१ मनीषितमिच्छा तदनुभावमिदं दानं कोऽयमिति मामेव।
ज्ञातस्यानुभावोऽयं कोऽसावतमाह मम लोकस्यावलोकनं यत् न चेदं मम स्वतपोबलेन प्राप्तमिति मन्तव्यं श्रीमा
मम्यस्ततस्सहृदतोऽपि मत्कृतमवादित्याह रहसि तपतपेति यदुपश्रुत्य परमं तपः चकर्थ कृतवानसि २२ २२

33A

तर्ह्यितां शक्तिं मयैवादिष्टमुपदिष्टं कदाचन तत्र तदा स्वस्यारंभेण विकर्मणा कार्यैर्विमोहिते सति किं च तपो नाम
ममैव शक्तिरित्याह तपो मे हृदयं मत्तरंगा शक्तिः आत्मा स्वरूपं यस्य ज्ञानमयं तप इति श्रुतेः २३ ग्रसामि संह
रामि बिभर्मि पालयामि वीर्यं शक्तिः २४ अध्यक्षोऽधिष्ठाता गुहायां बुद्धौ अवस्थितः यद्यपि वेद तथापि तु न वे
त्यन्वयः २५ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा नाथ नाथय अभिलषितं प्रयच्छ नाथितं याचि
तं नाथ नाथय याञ्जापनात् पेक्षयाशीषु नाथितमेवाह परे सत्त्वे अपरे स्थूले चेत रूपे यथा जानीयां २६ यथा

प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते तपो मे हृदयं साक्षादात्माहं तपसोऽनघ २३ सृजामि तपसैवे
दं ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः २४ ब्रह्मोवाच भगवन्सर्वभूतानामध्य
क्षोऽवस्थितो गुहाम् वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् २५ तथापि नाथमानस्य नाथ नाथ
य नाथितम् परावरे यथा रूपे जानीयां ते त्वरूपिणः २६ यथात्ममायायोगेन नानाशक्त्युपबृं
हितम् विलुंपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना २७ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथो
र्णुते तथा तद्विषयां देहि मनीषां मयि माधव २८ भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः
नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् २९ ॥

वं क्रीडसि तथा तद्विषयां मनीषां मह्यं देहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुंपन् संहरन् विवि
धं सृजन्बिभ्रत्पालयन् आत्मना स्वयमेवात्मानं ब्रह्मादिरूपं गृह्णन् क्रीडसि २७ [redacted] ऊर्णुते तंतुभिरा
त्मानमाच्छादयति तत्किं स्पष्टे रूढिर्न एवं तत्त्वज्ञानं प्रार्थयसे २८ भगवता त्वया शिक्षितं तदनुष्ठितं अहं अतं
द्रितः अनलसः सन् करिष्यामि ननु हि किमनेन तत्त्वज्ञानेन तत्राह यस्मादेवंभूतात्तवानुग्रहात् न जास

[illegible]

34

श्री
भा॰टी॰
टी॰
३७

अवक्लवं च मदो भविता मत्तः किंचित्कालं माभूदिति प्रार्थयते यावदिति भो ईश यावत्त्वया लौकिकस्य सख्युः स
खेवाहं कृतः करस्पर्शादिना ममत्वेन संमानितः सन् प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितः अविक्लवः
अव्याकुल एव यावज्जनं विभजामि इदं त्वमम अधमादिभेदेन सृजामि तावत्त्वत्संमानादहमप्यजः स्वतंत्र इति
मानिनो मे समुन्नद्ध उत्कटो मदो माभूत् यद्वा मदो मा समुन्नद्धमा समुन्नह्यतां उद्रिक्तो न भवेदित्यर्थः ॥ २९ ॥ ज्ञा
नं परमगोप्यं विज्ञानमनुभवः रहस्यं भक्तिः तद्गोप्यमपि वक्ष्यामीति निर्देशमात्रं तस्यांगं साधनं ३० ॥ यावानह

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनं अविक्लवस्ते परिकर्मणि स्थितो मा
मे समुन्नद्धमदोऽजमानिनः २९ श्रीभगवानुवाच ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् सरहस्यं त
दंगं च गृहाण गदितं मया ३० यावानहं यथाभावो यद्रूपगुणकर्मकः तथैव तत्त्वविज्ञानमस्तु
ते मदनुग्रहात् ३१ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् पश्चादहं यदेतच्च योऽवशिष्येत सो
स्म्यहम् ३२ ॥ राम

रूपतः यथाभावो यादृक्सत्त्ववान् यानि रूपाणि गुणाः कर्माणि च यस्यैतत्सर्वं सम्यक् उपदिशन् यावानित्य
स्यार्थं स्फुटयति ३१ अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किंचित् यत्स्थूलं असत् सूक्ष्मं च तयोः परं कार
णं प्रधानं तस्यान्तर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलेन चान्यत् कर्तृत्वं पश्चात्सृ
ष्टेरनंतरमपि अहमेवास्मि यदेतद्विश्वं तदहमस्म्यहमस्मि प्रलये योऽवशिष्येत सोऽप्यहमेवानेन चानाद्यंतत्वा
द्द्वितीयत्वाच्च परिपूर्णत्वमित्युक्तं भवति यथा त्वमायायोगेन तत्त्वेन मायायाश्च पृष्ठता दृश्यमानाया अपि यो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऋतेर्थं विनापि वास्तवमर्थं यद्यतः किमप्यनिरूपमात्मन्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तदात्मनः मममायां
विद्यात् यथा आभासो द्विचंद्रादिरित्यर्थं विना प्रतीतौ दृष्टांतः यथा तम इति सतो अप्रतीतौ भूतेषु यथा आभासः इत्येतस्य
रूपाति असतः प्रतीतौ दृष्टांतो द्विचंद्रः वस्त्वन्तरमिथ्यासतः प्रतीतौ दृष्टांतः तमो राहुर्यथा ग्रहाणामध्ये सन्नपि न
प्रतीयते राहुः स्वरूपेणाप्रतीयते इति ३४ यथा महाभूतानि भौतिकेषूच्चावचेषु सृष्टेरनंतरं प्रविष्टानि तेषूपलभ्यमानत्वात् अ
प्रविष्टानि च प्रागेव कारणत्वेन तत्र विद्यमानत्वात् तथा तेषु भूतभौतिकेषु अहं न चैतेष्वहं एवंभूतानामसत्तं
त्वं च साधनमाह ३५ आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्यं येन तदेवाह अन्वयः कार्येषु कारणत्वे

ऋतेर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३४ यथा महांति भूता
नि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ३५ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्म
नः अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३६ एतन्मतं समातिष्ठ परमेण समाधिना भवान्कल्प
विकल्पेषु न विमुह्यति कर्हिचित् ३७ श्रु ३ व संप्रदिश्यैवमजनो जनानां परमेष्ठिनम् पश्यतस्तस्य
तद्रूपमात्मनो न्यरुणद्धरिः ३८ अंतर्हितेंद्रियार्थाय हरये विहितांजलिः सर्वभूतमयो विश्वं ससर्जेदं स पूर्व-

नानुवृत्तिः निःकारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्कार्येषु साक्षितया अन्वयः व्यतिरेकश्च समा
ध्यादौ निजस्वरूपेणावस्थानात् कार्येभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु कार्येषु साक्षित्वात् एवमन्वयव्य
तिरेकाभ्यां यत्स्यात्सर्वदा तदेवात्मेति निश्चयं वक्तुं श्लोकी श्रीभागवतरहस्योत्पत्तिभूता अधुना यथार्थितेन हमानः
प्रजासर्गीभिजित तत्पुरस्कारोकरोति ३६ एतन्मतं सम्यगनुष्ठ स्वसमाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विवि
धाः सृष्टयः तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ३ एवं तं संप्रदिश्य आदिश्य अजनो जनानां परमेष्ठिनं परमे
श्वाधिपत्ये स्थितं अजनानां आत्मनः तद्रूपं न्यरुणत् अंतर्हितवान् ३८ अंतर्हितं इंद्रियार्थः प्रपंचो यद्रूपेण

अन्वयव्यतिरेक साधनेनात्मजि ज्ञास्यमर्थः ४

तस्मैबद्धांजलिः सत २२ ॥

अन्वयः

35

श्री
भा॰
टी॰
२५

ततोऽनंतरं पूर्वोक्तब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति पंचभिः प्रजानां भद्रं समन्विच्छन् विसृजन् तत्सेव स्वा
र्थकाम्यया स्वप्रयोजनेच्छया तया यमनियमान् अहिंसासत्यास्तेयादयो यमाः शौचं संतोषस्तपस्स्वाध्यायादयो नियमाः तानास्थ
तिष्ठत् ४१ रिक्थादीनां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादिना परितोषयामास किं मिच्छ
न् विष्णोर्मायां विविदिषन् ४२ निशाम्य दृष्ट्वा नावेत्यर्थः मां मां ४३ भगवता वक्तुः ब्रह्मोक्ताः संक्षेपतेत्योक्तं
विस्तरेणाह दशलक्षणमिति लक्षणीयाः अर्था विद्यंते यस्मिंस्तत् तन्मं प्रदायतो भागवतं मायाख्याने

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ४१ तं नारदः
प्रियतमो रिक्थादानामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४२ मायां विविदिषन्वि
ष्णोर्मायेशस्य महामुनिः महाभागवतो राजन्पितरं पर्यतोषयत् ४३ तुष्टं निशाम्य पितरं लो
कानां प्रपितामहम् देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ४४ तस्मा इदं भागवतं पुराणं दश
लक्षणम् प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ४५ नारदः प्राह मुनये सरस्वत्यास्तटे नृप
ध्यायते ब्रह्म परमं व्यासायामिततेजसे ४६ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्या
स्ये प्रश्नानन्यांश्च कृत्स्नशः ४७ इति भा॰ द्विती॰ स्कं॰ नवमोऽध्यायः

इत्यादशायेनाह नारदइति नवमोऽध्यायः ९ ॥ ४६ भागवतव्याख्याने नैव ब्रह्मप्रश्नानां द्वारं सास्या
मीत्याह यदुतेति ४७ पुरुषवयवैर्लोकाः सपालाः पूर्ववत्कल्पिता इत्यादिना वैराजात्पुरुषादिदं विश्वं कथ
मासीदिति निषरपृष्टं त्वया पृष्टः तद्यथा उपाख्या मिश्राणितिशेषः ४८ इति श्री भा टी का
द्वितीये नवमोऽध्यायः ९ ततो भागवतव्याख्यावादौ रैवदृशम् स्फुटम् राजप्रश्नोत्तरं वक्तुं मारेभे बादरायणिः
दशलक्षणपुराणं प्रोक्तमुक्तेनानिदशलक्षणानि स्पष्टं वर्णयति श्रवेति ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

35A

दशलक्षणान्याह अत्रेति अत्राशरीरस्य विष्णोः पुरुषरूपीकारः सर्गः पुरुषाद्ब्रह्मादीनामुत्पत्तिर्विसर्गः २ तेषामा
धारार्थं निश्चातिः स्थानं ३ स्थितानामभिवृद्धिः पोषणं ४ पुष्टानामाचाराकृतिः ५ तत्रापि सदाचारो मन्वंतरं ६ तत
श्रीभिर्विष्णुभक्तकथा ईशानुकथा ७ विष्णुभक्तानां प्रपंचाभावो निरोधः ८ निष्प्रपंचानां स्वरूपलाभो मुक्तिः ९ मु
क्तानां ब्रह्मत्वतद्रूपेणैव स्थान वस्थानमाश्रयः १० मन्वंतराणि ईशानुकथा इति द्वंद्वः सर्गादयो ऽयं याऽदशा
र्थालक्षंते एव तत्तदाख्यानेन तत्तात्पर्येण तस्यैव वर्णनं॥ ननु एवमर्थभेदात् शास्त्रभेदः स्यात् तत्राह ११ दशमस्या
श्रयस्य विशुद्ध्यर्थं तत्त्वेनावगत्यर्थं नवानां लक्षणं स्वरूपं पृथक्स्यैव आधारमात्राये दोषः इत्यर्थः ननु नैवं प्रतीय
ते अत आह श्रुतेन श्रुत्यैव श्रुत्यादिस्थानेषु नसाक्षात् वर्णयंति अर्थेन तात्पर्यवृत्त्या तत्तदाख्यानेषु सा

श्री क वा अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः १
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २ भूतमा
त्रेंद्रियधियां जन्म सर्ग उदाहृतः ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुंठविज
यः पोषणं तदनुग्रहः मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ४ अवतारानुचरितं हरेरस्यानुवर्ति
नाम् पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ५

र्गादीनां प्रत्येकं लक्षणमाह २ भूतानि आकाशादीनि मात्राणि शब्दादीनि इंद्रियाणि च धीशब्देन महदहं
कारौ गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्तुः भूतादीनां यद्विराड्रूपेण स्वरूपेण च जन्म
सर्गः पुरुषो वैराजः तत्कृतः पौरुषः चराचरसर्गो विसर्गः ३ वैकुंठस्य श्रीभगवतो विजयो उत्कर्षः सृष्टानां
तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणं तदनुगृहीतानां मन्वंतराधिपती
नां धर्मः कर्मणां वासना ऊतयः वे सैतेत्त संताने ऊयंते कर्मभिः संतन्यते इति ऊतयः पद्धो हस्त्यायोन्से
स्वेच्छायाद्यवचने धीनो विदच्छपूर्व्वे कर्मभिर्बध्यते संश्लिष्यते इति वा ऊतयः इत्यर्थः ४ हरेरवता

तानां स

श्री भाटि टी ३९

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुपश्चात् शक्तिभिरुपाधिभिः सह शयनं लयः निरोधः अयमर्थः यथा स्वप्नविप्र
याध्यस्तं कर्तृत्वादि हित्वा स्वरूपेणाकलनया व्यवस्थितिर्मुक्तिः २ आभासः सृष्टिः विरोधो लयश्च यतो भवति अध्य
वसीयते प्रकाश्यते च स ब्रह्मेति परमात्मेति प्रसिद्ध आश्रयः कथ्यते आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टयि
तुं तमध्यात्मादिविभागमाह ७ योयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवा
धिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः न चैकस्मिन्नुभयोर्द्विरूपो विच्छेदो यस्मात्स आधिभौतिकः चक्षु
र्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः स वा एष पुरुषोऽन्नरसमय इत्यादिश्रुतेः

निरोधोस्यानुशयनमात्मनः सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः आभा
सश्च निरोधश्च यतश्चाध्यवसीयते स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७ योऽध्यात्मिकोयं पु
रुषः सोसावेवाधिदैविकः यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ८ एकमेकतराभावे
यदा नोपलभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ९ ॥

एवमेकतराभावेऽन्येषामन्योन्यसापेक्षत्वसिद्धेरनन्यात्मत्वं दर्शयति तथाहि दर्शनं विना तत्प्रतीत्यनुमे
यं करणं सिद्ध्यति नापि द्रष्टा न च तत्करणादि विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना कर
णं प्रवर्तते न च तद्विना दृश्यमित्येकतराभावे एकं नोपलभामहे तत्र तदा तत्त्रितयं आलोचनात्मकेन
प्रत्ययेन यो वेद स आत्मा परमात्मा आश्रयः तेषामपि परस्परमाश्रयत्वमस्त्येवेति तच्च वच्छेद्य
दृष्टविषयोर्वेदेनाश्रयः अन्यस्याश्रयः स वा आसावन्येषामाश्रयश्चेति तथा च भगवानवादीत् दृश्यमार्कं वपुः
अपरस्परं सिद्ध्यति यः स्वतः स आत्मा च येषामपरोपाश्रयः स्वयानुभूत्याखिलसिद्धसिद्धिरिति एतेन चैक्य
भिधाहित्वान्नेषां मायामयत्वमुक्तमनयश्च पुरुषाश्चयश्चैर्लोकाः स पालाः एवं कल्पितः लोके रसुध्याय

भा॰ टि॰ ३९

36A

एवमेवाध्यात्मादिविभागंप्रपंचयन यदुक्तंत्वयापृष्टोवैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्य इतिप्रतिज्ञातंतत
उत्पत्तिप्रकारमाह पुरुष इति पुरुषोवैराजः अंडंविनिर्भिद्यपृथक्कृत्वास्थितः इत्यर्थः अयनंस्थानमन्विच्छन वि
सृष्टवान यतः शुचिः स्वयमतः शुचीः शुद्धाः आपः गर्भोदकसंज्ञाअस्राक्षीत्ससर्ज अप्सुवासंनारायणोनामसबभू
वेतिनान्विततेनाप्सुवासेनयद्यस्मात्पुरुषोनरः तस्मादुद्भवायाआपस्ताः नाराः अयनंयस्येतिनाराय
णः तदुक्तं आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणः स्मृतइतितस्यप्रथमा

पुरुषोंडंविनिर्भिद्ययदासौसविनिर्गतः आत्मनोयनमन्विच्छन्नपोस्राक्षीच्छुचिः शुचीः १० तास्ववात्सीत्स्व
सृष्टासुसहस्रंपरिवत्सरान तेननारायणोनामयदापःपुरुषोद्भवाः ११ द्रव्यंकर्मचकालश्चस्वभावोजी
वएवच यदनुग्रहतःसंतिनसंतियदुपेक्षया १२ एकोनानात्वमन्विच्छन्योगतल्पात्समुत्थितः वीर्यं
हिरण्मयंदेवोमाययाव्यसृजत्त्रिधा १३ अधिदैवमथाध्यात्ममधिभूतमितिप्रभुः अथैकंपौरुषंवीर्यंत्रि
धाभिद्यततच्छृणु १४ अंतःशरीरआकाशात्पुरुषस्यविचेष्टतः ओजःसहोबलंजज्ञेततःप्राणो
महानसुः १५ ॥

वमाह ११ द्रव्यंपंचमहाभूतानिउपादानं कर्मादीनिनिमित्तानिजीवोभोक्ता यस्यानुग्रहात्संतिकार्यक्षमा
भवंतीत्यर्थः १२ योगएवतल्पःशय्यातस्मात्वीर्यंगर्भंतद्रूपंदेहंहिरण्मयमिवप्रकाशबहुलंतस्यैवप्रपंचः १३
अथैकमित्यादिनांअंतः शरीरेयआकाशः तस्मात्क्रियाशक्त्यात्मनत्रविविधंचेष्टमानस्यसतः ओजइंद्रियशक्तिः
सहोमनःशक्तिः बलंदेहशक्तिः ततःप्राणात्मकात् सूत्रात्मरूपान्प्राणाः सूत्राख्यः महान्मुख्यः असुःप्रा

एवंत्र्यधिदेवादिरूपेणत्रिधाभिन्नस्यापिकार्यस्यएवंपौरुषंपुरुषसंबंधिक्रियाशक्तिरूपंत्रिधाभिद्यततच्छृणु २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

37 सर्वेषां

श्री भाष्य टी ६७

महत्त्वं दर्शयति प्राणानामिन्द्रियाणां यं प्राणो नैव चेष्टां कुर्वन्तमनुपश्यन्ति प्राणोति चेष्टां करोति अपानो नैव चेष्टां त्यजन्तं
अनुअपानेन निचेष्टां त्यजति तिरानानामवचष्टत्याख्य १५ त्विपता बालयना निर्भिन्नेन त्वद्वन्द्वेन्द्रियाद्विकं विराड्जी
वाभेदेनोपासनार्थमुक्तं घ्राणनायतेस्म ततो गन्धः ततः भक्तायितमिक्ष्वन ः इत्यर्थः आकृष्यमानस्य भियेत तवि
भक्तमभूत १७ तालव्यधिष्ठाने जिह्वा इन्द्रियं नानारसो विषयः वरुणश्च देवतान्तानेवा एवं सर्वत्राधिष्ठा
नेन्द्रियं देवता विषयः इत्येतच्चतुष्टयमनुक्रमपूर्ह्य १८ विवृतो वक्त्रमित्यो ः मुखंततएव वह्निर्देव

अनुप्राणितियं प्राणाः प्राणं तं सर्वं गतव अपानं तमपानं तन्नर देवमिवानुगाः १९ प्राणो नत्विपता ल
नूतं तरानाय्येन प्रभोः पिपासनो नत्ततश्च प्राप्तः मुखं निरभिद्यत १७ मुखंतस्तालु भिन्नं जिह्वा त
आयजायते ततो नानारसोत्पन्ने जिह्वया यो धिगम्यते १८ विवृतो मुखतो भूम्नो वाद्व वीर्य व्याहृत
तयोः गत्वे वैतस्यस्य विवरं निरोधः समजायत १९ नासिके निरभिद्येतां दोधूयतेन महति नव
वायुर्गंधवहो घ्राणेनमिति हूतः २० यदात्मनि निरालोकमात्मानं न वदिद्दवतः निभिन्ने सति
तीतस्यज्योति श्चक्षुर्गुणाग्रहः २१ बोध्यमानस्य कर्णौ मिमिरानमनस्तज्जिघृत्तः कर्णौ च निरभिद्येतां
दिशः श्रोत्रं गुणाग्रहः २२ ॥

तावादीन्द्रियं व्याहृतिभांषणांत यो रितीन्द्रियदेवताधीनत्वं कर्मणो दर्शयति १९
नभस्वतिघ्राणवायोः दोधूयति धूयमानेन प्रचलवतीति सति तन्नासिकायां वायुर्देवता गंधं वहतीति तया
नेन गंधो विषयो दर्शितः घ्राणं इन्द्रियं निहूतः ततः गंधं ग्रहीतुमिच्छतः २० निरालोके प्रकाशशून्यमासीदि
ति शेषः निर्मलित्कमिति वदेकुर्वन्नाख्य तदात्मानं देहं च काराद्दन्य अवस्तद्दिदृक्षतः अक्षिणी स्थाने ज्योतिः
आदित्यो देवता चक्षुरिन्द्रियं ततो गुणस्य रूपस्य ग्रहः ग्रहणं नेन रूपं विषयो दर्शितः २१ अक्षिभिर्दे वोधमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लघुत्वे ककारादिस्थं वस्तु इन्द्रियं गुरुत्वं च ग्राहयन्ने ... मीषदुष्मत्वं च शीततां चेत्यर्थः यस्याल्पत्वं स्पर्शेन्द्रियं तथा
पिन्यात्वे तत्राभावात् कोमलमित्यर्थः गुर्वादिस्पर्शपारे यत्ता देशः छादकः वस्त्रनपत्राद्यवमनि जितृहत्तः त्वचि
भिन्नात्वगिन्द्रियाधिष्ठानं चर्म जानीमित्यर्थः तस्यां रोममालाइन्द्रियमहीरुहस्य देवतानामानः वस्त्र निहस्तेनातो
लिते लघुत्वे तत्वे वर्त्तानां रूपितमिन्द्रियविषयत्वमिति पोषणीकाः तत्र त्वचि श्रेत्र बहिस्थवातो हतः श्रावृत्य
स्थितः कर्त्तरि निष्णाकार्यभूतः त्वचा लब्धगुणः स्पर्शायते श्रयमर्थः त्वगिन्द्रियमेव बहिः कंदूतिसहितं स्पर्श
गृहीत्वा त्वलोमयन्त्रे नोच्यते तत्र महीरुहाणां देवत्वं श्रेत्र बहिस्थरूपं स्पर्श गृहीत्वा न तेदेवत्वं कूपाहे नोच्यते तत्र वालो
देवता त्वया च तृतीये वक्ष्यति तनुमस्य वितिर्भिन्ना विविच्छर्पिरस्पेमा ओषधीः श्रेष्ठेन लोमभिः कंदूयो सौ प्रति

वस्त्रेणाम्रदुकाठिन्यलघुगुर्वोष्मशीततां । निवृत्तास्त्वक्विनिर्भिन्ना तस्यां रोममहीरुहाः ॥ २६ ॥ तत्र चान्तर्बहि
र्वायुः त्वचा लब्धगुणोवृतः ॥ २७ ॥ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया । तयोस्तु बलवानिन्द्र आदान
मुभयाश्रयः ॥ २८ ॥ गतिं जिगीषतः पादौ रुरुहाते ऽभिकामुकौ । पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रि
यते नृभिः ॥ २९ ॥

पद्यते इति निर्भिन्नायास्य चर्माणि लो कपालो निलो विषात प्राणेनांशेन संयेना सो प्रतिपद्यते
इति तत्र मर्माणीति मर्मोपलक्षिता त्वगित्यर्थः प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिन्द्रियेणेत्यर्थः वहूर्वक्त्र तो
लेकपवांशो निर्दिष्टः त्वगिरभिपर्यन्त वालोमानिलो मस्पर्शो वयिवनस्पतेः इति २६ विवरणे पूर्वं वलि
लितं २७ रुरुहतुर्निर्भिन्नौ बलमिन्द्रियं इन्द्रो देवता तत उभयाश्रयमादानं कर्म २८ अभिकामुकौ अभीष्टावि ह
तावित्यर्थः पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृत्वेन स्थितः कर्मभिरिति गत्यात्मकं कर्म पादि किंचि
यज्ञं क्रतु हव्यं क्रियते इति शेषः यज्ञार्थं द्रव्यविषयेष्टा क्रम २९ ॥

गति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाहि टी॰ २८

न्नभिरितिचक्षुर्भूपिरयमेवरीतिरितिदर्शयन्नधिकारितंयत्नादीनांदर्शयति प्रजापत्यमानंदोरतिः अप्रतंस्मीदितनट
पित्रिनःशिश्नोधिष्ठानंउपस्थइंदियंप्रजापतिस्वासीदितितेयं तदुभयाश्रयं कामानांस्त्रीसंभोगानांसंवंधि
प्रियंसवं २९ धातमलेभ्यो न्नादीनांप्रसारांधांत्यक्तमेवतः गुदपायुमित्रोत्सर्गांअधिष्ठानेंद्रियदेवता नाभिद्वारं
विषयाः ३० पुर्यादेहात्सुरादेहांतरगमिआसीत्स्पर्शः सर्वतोगतमिल्लोः निरभिद्यतेत्वगुणः अपानः
अपगच्छतः पृथक्त्वमरणनाभ्यादीनधिष्ठानादीनिनाभ्याद्विशब्दः पानयोः बंधविश्लेषणात्मस्तुरितिप्रसिद्धं २९

निरभिद्यतशिश्नोवैप्रजानंदाय तर्पिनः उपस्थआसीत्कामानांप्रियंतदुभयाश्रयं २९ उत्सि
सृष्टार्थंतुमलेनिरभिद्यतवैगुदं ततःपायुस्ततोमित्रं उत्सर्गा उभयाश्रयः ३० आसीत्स्पर्शः
पुरः पूर्वानाभिद्वारमपानतः तदपानस्ततोमृत्युः पृथक्त्वमुभयाश्रयम् २८ आदित्योरस
पानानामासनकृत्येत्वनाडयः नद्यःसमुद्रास्तयोस्तुष्टिःपुष्टिस्तदाश्रये २९ निदिध्या
सोरात्ममायां हृदयं निरभिद्यत ततोमनस्ततश्चंद्रः संकल्पः काम एव च ३१

अन्नपानानामादित्योः संग्रहीतमिल्लोः कुक्षिरस्त्र अंत्राणि च नाड्यश्च आसन् तत्र कुक्षिरधिष्ठानं अंत्राणिपक्वाश
यश्चेकरणमिंद्रियस्थानीयं नाड्यस्तपानसंग्रहे तयोर्नाड्यन्नवर्गयोः कर्मस्तेनयश्च समुद्राश्चदेवतेतत्वहि
रुदरभरणंपुष्टिस्तरसपरिणामतः सोल्लेतदाश्रये तदुभयनिमित्तेतयोरन्नसंग्रहे हो ल्लोः कुक्षेरन्नसमुद्रलक्षणे
येसंग्रहे हक्कोः कुक्षिनाडीनदीपुष्टयेयइतिविवेकः २९ निदिध्यासोर्नितरांवितत्यितमिल्लोः कामोभिला
षः हृदयमनः चंद्रसंकल्पा अधिष्ठानादयः तदेवमपि देवादिभेदविभज्यो क्तात देशाभूता नो धात्वादीनांस्व हृदयमारभ्यनाभिनिवृत्त्यां ३१॥

२८

त्वक्स्थूलं चर्मैतद्रूपाश्रितं सप्तमं त्वगात्मयोः स्थिताः द्वंद्वैकद्भावेन निर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः
तेषां त्वक् चर्मेन्द्रियं केचिदपि वाय्वाकाशयोर्यो यद्धारादिरूपेण तासां वर्धकत्वाभावादेवमुक्तम् ३१ गुणात्मकानि गुणो
द्भवानीन्द्रियाणि येषां विषयाभिमुखस्वभावानीत्यर्थः गुणाः शब्दादयः तामसाहंकारः भूतादिरहंकारः
ततः प्रकर्षेण भवंतीति तथाहंकारकल्पितशोभनस्वभावाः नवस्त्वतः तथेत्यर्थः सूत्रहेतुः यतो मन
एव सर्वविकाराणामात्मा स्वरूपं बुद्धिस्तु तथा विधार्थविज्ञानरूपिणी न तु परमार्थग्राहिणीति वेया।

त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ३२ गुणा
त्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३३ एतद्भग
वतो रूपं स्थूलं ते व्याहृतं मया मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३४ अतः परं सूक्ष्मतम
मव्यक्तं निर्विशेषणं अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ३५ अमुनी भगवद्रूपे मया
ते ह्यनुवर्णिते उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ३६ ॥

ण्यायमुक्तम् अनेनैव बुद्धिमनसोः स्वरूपमुक्तं प्रसंहरति एतदिति ३३ गुणात्मप्रकृत्या सह अष्टभिः स्थू
लस्य कार्यस्य समष्टिलिंगशरीरमाह ३४ अतः परमस्य स्थूलस्य कारणभूतं सूक्ष्ममतीन्द्रियं यतस्तदव्यक्तं तत्कु
तः यतो निर्विशेषणं तत्कुतः अनादिमध्यनिधनं उत्पत्तिस्थितिलयशून्यं नित्यं सदैकरूपं अपेक्षयाऽपि स्थूलरूप
मित्यर्थः अत एव वाङ्मनसश्चेति द्वैकायम् तस्मात्परमस्योपासनार्थं भगवत्यारोपितरूपद्वयमपि वदन्नपि अ
मुनी इति ३५ न गृह्णन्ति नांगीकुर्वन्ति विद्वांसः यतो मायासृष्टे अपरूपगुणकर्मकर्तृत्वं भगवतो ब्रह्मणो
प्रतिनत्य वंचयितुं ब्रह्मादिरूपेण तत्कर्माणि चारह भवंति ३६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

39

स्वांशभावेनेत्यर्थः प्रातत्तेनेत्यंशेनेतस भगवान् ब्रह्मरूपधृत् सन् वाच्यवाचकतया नामानि वाच्यतया रूपा
णि क्रियाश्च तेने सम्यक् तनोतीत्यर्थः मायया सकर्मा सव्यापारः सन् न वस्तुतः अकर्मकः पतत्यपेच्यत इति प्रजापतीन्निति सार्धे
श्रीभा टी ३९ त्रिभिः ३७ द्वितीयांतानां यथते इत्यन्वयः ततः प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्तत्कर्माणि च वक्ष्य
३८ निरूपयति तत्तदवांतरभेदेन ३८ गिरीनित्यस्यानेनतत्त्वरूपेति संबोधनं किन्नरादयः प्रसिद्धाः गरुडः
ति ४० द्विविधाः स्थावरजंगमरूपेण चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण जलस्थलनभसि प्रसिद्धा इति

स्वांशाच्च वाचकतया भगवान् ब्रह्मरूपधृक् नामरूपक्रियाधत्ते सकर्माकर्मकः परः ३७ प्रजापती
न्मनून्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगन्धर्वान्विद्याध्रासुरगुह्यकान् ३८ किन्नराप्सरसो
नागान्सर्पान्किंपुरुषान्नरान् मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ३९ कूष्माण्डोन्माद
वेतालान्यातुधानान्ग्रहानपि खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान् ४० द्विविधाश्चतु
र्विधा येऽन्ये जलस्थलनभौकसः कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ४१ सत्त्वं रजस्त
म इति तिस्रः सुरनृ[illegible]नारकाः तत्राप्येकैकशो राजन्भिद्यन्ते गतयस्त्रिधा यदैकैकतरोऽन्या
भ्यां [illegible] स्वभाव उपहन्यते ४२॥

शांतानुपपन्नेः स्वतिर्वर्णनावान्वयः यच्च राज्ञा पृष्टं यावत्यः कर्मगतयो
यादृशीर्द्विजसत्तम इति तस्यापि प्रसंगादेवोत्तरमाह कुशलाकुशलामिश्राः कुशलानीचाः मिश्रा इति पदोत्तरं
पुण्यः मिश्रा मध्यमाः कर्मणां पुण्यापुण्यमिश्राणां गतयः फलानि ४१ सत्त्वादिभेदेन कर्मगतिवैचित्र्यं प्रपंचयति
सत्त्वमिति सत्त्वादयः तिस्रो गतयः सुरादिशब्दैः ऋषीणामुपलक्षणार्थाः ४२ अन्याभ्यां गुणाभ्यां स्व।
भावो गुणा उपहन्यते अभिभूयते ब्रह्मरूपेणास्रष्टत्वमुक्तास्वरूपेणापालकत्वमाह ४३॥ ३९

सएवभगवान्स्थितियायवत्तमैविश्वंस्थापयन्तिर्यगादिरूपेणपुष्णातिभोगैःसंवर्धयति रुद्ररूपेणसंहर्त्तृ
त्वमाह ४४ ततइत्यात्मनःसकाशाद्यदिदंसृष्टंतत्सन्नियच्छतिसंहरति कर्तृत्वाद्यपवादेनदशमस्यशुद्धि
मा ४५ इत्थंभावेनेत्यादिरूपेणतस्माद्वाएतस्मादात्मनआकाशःसंभूतःसोऽकामयतबहुस्यांप्र
जायेयेत्यादिश्रुत्याकथिताः सूरयस्तुपरंकेवलंएवंरूपेणद्रष्टुंनार्हन्तीति ४६ नन्विमतःअस्यविश्व
स्यजन्मादौकर्मणिपरस्येश्वरस्यइत्थंभावःकर्तृत्वेनास्तिश्रुत्यापितात्पर्येणनप्रतिपाद्यते किंतु

सएवेदंजगद्धाताभगवान्धर्मरूपधृक् पुष्णातिस्थापयन्विश्वंतिर्यङ्नरसुरात्मभिः ४४ ततःका
लाग्निरुद्रात्मायत्सृष्टमिदमात्मनः सन्नियच्छतिकालेनघनानीकमिवानिलः ४५ इत्थंभावे
नकथितोभगवान्भगवत्तमः नेत्थंभावेनहिपरंद्रष्टुमर्हन्तिसूरयः ४६ नास्यकर्मणिजन्मादौ
परस्यानुविधीयते कर्तृत्वप्रतिषेधार्थंमाययारोपितंहितत् ४७ अयंतुब्रह्मणःकल्पःसवि
कल्पउदाहृतः विधिःसाधारणोयत्रसर्गाःप्राकृतवैकृताः ४८ ॥

अत्रविधीयतेअनुवर्ण्यतेकिमर्थंकर्तृत्वप्रतिषेधार्थंहियतोमाययातदारोपितंअकाशानंतथाचश्रु
तिः निष्कलंनिष्क्रियंशान्तंनिरवद्यंनिरंजनम् इंद्रोमायाभिःपुरुरूपईयतेइत्याद्या ४७ उक्तमर्थमु
पसंहरतिअयंत्विति ब्रह्मणः संबंधीकल्पोमहाकल्पः विकल्पोवांतरःतत्सहितउदाहृतःउदा
हरणेनसंक्षेपतउक्तः कथंभूतःयत्रमहाकल्पेप्राकृतामहदादिसर्गाःअवांतरकल्पेषुवैकृताः
स्थावरादिसर्गाइत्ययंविधिःप्रकारःअन्यैर्महाकल्पादिभिःसाधारणः ४८ वक्ष्यमाणंविस्तारंप्रतिजा
नीतेपरीति ॥ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

40

श्री
भा॰दि
टी॰
७॰

परिमाणं स्थूलं सप्तमे च कल्पस्य लक्षणं इयानेवं रूपं इति तद्विग्रहः सर्वान्तरकल्पमन्वन्तरादिरूपं भागेव
यथावद्वितीयेनाशुरस्तात् तृतीयस्कन्धे व्याख्यास्यामि तत्र च पाद्मं कल्पमथो इति कार्त्स्न्येन व्याख्यायमानं

परिमाणं च कालस्य कल्पलक्षणविग्रहं यथा पुरस्ताद्व्याख्यास्ये
पाद्मं कल्पमथो शृणु १० ॥शौनक उवाच॥ यदाह भगवान्सूत नः क्ष
त्ता भागवतोत्तमः चचार तीर्थानि भुवस्त्यक्त्वा बन्धून्सुदुस्त्यजान्
११ क्षत्तुः कौषारवेस्तस्य संवादोऽध्यात्मसंश्रि
तः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह
१२ ॥

शृणु यदर्थे सम्यगतिनिरूपणं तदेवं सातत्येन श्रोतुकामः कथांतरं पृच्छति ११ यदाहेति भुवः संबं
धीनि तीर्थानि यद्वा भुवः देशानि चेति १२ कौषारवेर्मैत्रेयस्य तत्त्वस्य अध्यात्मतत्त्वाने संश्रितः संवादः १२
॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

41 पुनरागमनाननत्वेचानिमित्तंब्रूहि ५२ राज्ञापृष्टइत्ययमर्थः यद्यप्यंपृष्टो तथापीदमेवराज्ञाभिप्रेतंपृष्टवान् शुको

श्री पिविदुरमैत्रेयसंवादंपुरस्कृत्ययत्पृष्टेंराज्ञाकृताःप्रश्नाः तदनुसारेणसर्वंपुराणार्थमवोचत् तदेवाहइतिमिथ्या

भा द्वि स्यामितयैवशुण्वतेति ५३ ॥इतिश्रीभावार्थदीपिकायांद्वितीयस्कंधेदशमोध्यायः १०॥ समाप्तोद्वितीयस्कंधः

टी ८८

ब्रूहिनस्तदिदंसौम्यविदुरस्यविचेष्टितम् बंधुत्यागनिमित्तंच

तथैवागतवान्पुनः ॥सूतउवाच॥ राज्ञापरीक्षितापृष्टोयदवोच

न्महामुनिः तद्वोभिधास्येशृणुतराज्ञःप्रश्नानुसारतः ५३

॥इतिश्रीभागवतेद्वितीयस्कंधेदशमोध्यायः ॥१०

समाप्तम् ॥ राम ॥

प्रतिपादितम् श्रीमद्भागवतेयेनसर्वमप्यात्मतोदितम् ब्रह्मनारदयोंप्रोक्तंतंवंदेगुरुमीश्वरम् यत्संव्यं

चितंविश्वंनरीनर्तिजगत्त्रयम् तंतमेवपृष्टेनयदत्रस्खलितंमम द्वितीयस्कंधसंबंधियदभावा।

र्थदीपिका उद्दीपितामियंमद्भिर्यतःस्यान्नम्रदीपिका ईशनामिच्छयामतःदम्यतांमममन्दाह

सम् मयाद्वितीयवोधायकृतंमेतन्नमस्तेनमः ॥ ॥

८८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative